२६ प्रमन्थ. २७ नेत्रम्

२८ अंतर्धानकट २९ हविर्धानपात्री ३० प्राशित्रहरणं ३१ चमसा.

३२ इडापात्री ३३ यजमानासनं ३४ पत्न्यासनं ३५ होत्रासनं.

३६ ब्रह्मासनम् ३७ यजमानस्य पात्री.

३८ पत्नीपात्री. ३९ कृष्णाजिनम्.

अथ द्वितीयं प्रकरणम् ।

यज्ञपात्राणि कात्यायनसूत्रे-ऋचो यजूꣳषिसामानि निगदा मन्त्रास्तेषां वाक्यं निराकांक्षं मिथः संबद्धं-वैकङ्कतानि पात्राणि खादिरः स्रुवः स्फ्यश्च पालाशी जुहूराश्वत्थ्युपभृद्वारणान्यहोमसंयुक्तानि बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बालाहꣳसमुखप्रसेका मूलदण्डा भवन्त्यारत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः स्फ्योऽस्याराकृतिरादर्शाकृतिः प्राशित्रहरणं चमसाकृति वा चात्वालोत्करावन्तरेण सञ्चरः प्रणीतोत्करावितिषु ॥ ३ ॥ विस्तरस्तु तत्रैव वा संस्कारभाष्ये द्रष्टव्यः॥ विस्तरभयान्न लिखितं ॥ विवाहप्रकरणे येषां प्रयोजनं तेषां प्रमाणं पृ० प० अमुकोपरि लिखितं अन्यान्यादर्शमात्राणि ॥

इति श्रीदैवज्ञदुनिचंद्रात्मजविष्णुदत्तसंगृहीतं गृहमण्डपपात्रचिह्नं नाम द्वितीयं प्रकरणं सप्रमाणं समाप्तम् ॥ २ ॥

अथ विनियोगवर्णनम् ।

व्याख्या लिख्यते । विदित हो कि आगामी सर्वमंत्रोंका साथ विनियोग दिखाया जावेगा इसलिये प्रथम विनियोगकी पुष्टि करते हैं कि विनियोग उसको कहते हैं कि ऋषि छंद देवताओंका स्वर कर्ममें योजन करना अर्थात् इस मंत्रका यह ऋषि और यह देवता अमुक छंद इनके यथार्थ ज्ञानको विनियोग कहते हैं और विना विनियोगके मंत्र सिद्धिको प्राप्त नहीं होता इस कारणसे विनियोगकी आवश्यकता है । ऋषि किनको कहते हैं—" द्रष्टारो ऋषयः " अर्थ—मंत्रद्रष्टा ऋषि होते हैं जैसे इस मंत्रका गौतम ऋषि वा भरद्वाज वा आङ्गिर इत्यादि ऋषि हैं वहां समझना कि यह मंत्र इस ऋषिको अपने तपोबलसे प्रत्यक्ष स्मरण भया उसको निश्चय गुरुसे किया था फिर वही मंत्र वेदके सदृश मिलनेसे वह ऋषि उस मंत्रका भया कि इसने प्रथम मालूम किया ॥ १ ॥ और देवता उनको कहते हैं—" स्मर्तारः परमेष्ठ्यादयः" अर्थात् जैसे ब्रह्माने अमुक वेदका स्मरण किया विष्णुने अमुक स्मरण करा इस प्रकार रुद्र, इंद्र, अग्नि, सूर्य, चंद्रादि जिस २ मंत्रोंको स्मरण करते भये वह उन २ के देवता भये ॥ २ ॥ अब छंद लिखते हैं—"छन्दो गायत्रीप्रभृतयः " अर्थात् गायत्रीसे आदि लेकर मंत्रोंके छंद होते हैं । अब छंदोंको यथावत् लिखते हैं कि जो वेदमंत्रोंके हैं । उक्ता १, अत्युक्ता २, मध्या ३, प्रतिष्ठा ४, सुप्रतिष्ठा ५, गायत्री ६, उष्णिक् ७, अनुष्टुप् ८, बृहती ९, पंक्ति १०, त्रिष्टुप् ११, जगती १२, अतिजगती १३, शक्करी

१५, अष्टि १६, अत्यष्टि १७, धृति १८, अतिधृति १९ प्रकृति २०, आकृति, २१, विकृति २२, संस्कृति २३ अभि कृति २४, उत्कृति २५ यह छंदसंख्या है ॥

अथ गायत्र्यादिच्छन्दोभेदाः.

	छन्दः	गायत्री	उष्णि.	अनुष्टुप्	बृहती	पंक्ति	त्रिष्टुप	जगती
१	आर्षी	२४	२८	३२	३६	४०	४४	४८
२	दैवी	१	२	३	४	५	६	७
३	आसुरी	१५	१४	१३	१२	११	१०	९
४	प्राजाप.	८	१२	१६	२०	२४	२८	३२
५	याजुषी	६	७	८	९	१०	११	१२
६	साम्नी	१२	१४	१६	१८	२०	२२	२४
७	आर्ची	१८	२१	२४	२७	३०	३३	३६
८	ब्राह्मी	३६	४२	४८	५४	६०	६६	७२

इस प्रकार सम्पूर्ण छन्दोंके अनेक भेद हैं विस्तारके भयसे लिखते नहीं एक गायत्री छन्द उदाहरण मात्र दिखला दिया है जिन महाशयोंको और भेद देखनेकी इच्छा हो वह समाष्य पिंगलसूत्र छंदःशास्त्रसे देख लेवे ॥

इति श्रीदैवज्ञदुनिचंद्रात्मजपण्डितविष्णुदत्तकृतऋषिच्छंददेवतावर्णनं नाम द्वितीयं प्रकरणं समाप्तम् ॥ २ ॥

अथ तृतीयं प्रकरणम् ।

ॐ स्वस्ति श्रीगणेशाय नमः ॥ श्रीगुरवे नमः ॥ अथ कात्यायनीशान्तिप्रयोगः ॥

आदौ गणपतिं वन्दे विघ्ननाशं विनायकम् ।
ऋषींश्च देवजननीं ग्रहस्थापनमारभे ॥ १ ॥

भा० टी०—श्रीगुरुचरणसरोजं नत्वा गणपत्यादिदेवांश्च ॥ कात्यायनकृतशान्तेः कुर्वे नृभाषभा टीका ॥ १ ॥ काव्यकलापे कुशला सन्ति यद्यपि सर्वभूदेवाः । सर्वजनसुखार्थमियं तौ क्रियते विष्णुदत्तेन ॥ २ ॥ श्री विघ्नविनाशक विनायक गणपतिजीको तथा ऋषियोंको देवजननी दुर्गाजी अथवा अदितिजीको वंदन कर प्रथम ग्रहोंकी यथावत् स्थितिका प्रारंभ करते हैं । देवजननी इस शब्दसे लक्षणद्वारा ब्रह्मा विष्णु रुद्रादि देवता और ब्रह्मविद्याका ग्रहण होता है ॥ १ ॥

मण्डलं च ततः कृत्वा सर्वतोभद्रमेव च ।
व्रतोपनयने चूडे यत्र शांतिरुदाहृता ॥ २ ॥
विवाहादौ लिखेन्नित्यं तिलकं नाम मण्डलम् ।
द्वादशांगुलमध्यस्थं वर्तुलाष्टदलं रविम् ॥ ३ ॥
चन्द्रमर्द्धं लिखेत्तत्र ह्याग्नेय्यां चतुर्विंशतिः ।
त्रिकूटं भूसुतं चैव दक्षिणे चतुरंगुलम् ॥ ४ ॥

धनुषाकारं नवांगुल्यमीशाने च बुधं तथा ।
उत्तरे च गुरुः स्थाप्यः पद्माकारो नवांगुलः ॥ ५ ॥
पूर्वे संस्थापयेच्छुक्रं चतुष्कोणं नवांगुलम् ।
खङ्गाकृतिं नवांगुल्यं प्रतीच्यां शनिमेव च ॥ ६ ॥
नैर्ऋत्यां राहुं संस्थाप्य मत्स्याकारं नवांगुलम् ।
केतुं दीर्घं यथा राहुं वायव्यां दिशि संस्थितम् ॥ ७ ॥
स्वस्वादिक्षु ग्रहाः स्थाप्याः संख्यारेखा भवेद्ध्रुवम् ।
भास्करांगारकौ रक्तौ श्वेतौ शुक्रनिशाकरौ ॥ ८ ॥
सोमपुत्रो गुरुश्चैव उभौ तौ पीतकौ स्मृतौ ।
कृष्णवर्णौ भवेच्छौरी राहुकेतू च धूम्रकौ ॥ ९ ॥
ब्रह्मा विष्णुश्च रुद्रश्च उत्तरे च तथानलः ।
इंद्रो वायुर्भवेत्पूर्वे सर्प्पकालौ च दक्षिणे ॥ १० ॥
ऐशान्यां कलशः स्थाप्य ओंकारादींश्च सर्वशः ।
मातरश्चोत्तरे स्थाप्या आग्नेय्यां योगिनीं न्यसेत् ११
कनिष्ठिकाप्रमाणेन रेखाः कार्याः प्रयत्नतः ।
स्थूलाःसूक्ष्मा न कर्तव्या यदीच्छेच्छ्रेय आत्मनः १२

इति ग्रहस्थापनम् ।

भा० टी०—व्रतमें उपनयन चूडाकर्म तथा जहां शांति हो वहां सर्वतोभद्र मण्डल रचना चाहिये, विवाहमें तिलक नाम मण्डल लिखे । यह मंडलका चित्र पीछे लिखा है इस लिये अर्थ सुगम होनेसे लिखते नहीं । तथापि सूर्य मंगल यह रक्त वर्णसे लिखे, बुध गुरु पीतवर्णसे, शुक्र चंद्र श्वेत और कृष्णवर्णसे शनि, राहु केतु धूम्रवर्णसे लिखे यदि कल्याणकी इच्छा हो तो न अति सूक्ष्म और न स्थूल लिखे । इति नवग्रहस्थापनाविधानम् ॥ २-११ ॥

अथ स्वस्तिवाचनम्.

शुक्लयजुर्वेद अध्याय २५ कं० मंत्र १९ ।

हरिःॐ स्वुस्तिनुऽइन्द्रोवृद्धश्श्रवाःस्वुस्तिनः॑पूषाविुश्ववेदाः । स्वुस्तिनुस्ताक्ष्र्योऽअरिष्टनेमिःस्वुस्तिनो बृहुस्पतिर्दधातु ॥ १ ॥

यजु० अध्याय ३५ मंत्र ३६ ।

पर्यः॑पृथिव्याम्पय ऽओषधीषुपयो दिव्युन्तरिक्षेपयोधाः । पयस्वतीःप्रदिशः॑सन्तुमह्यम् ॥ २ ॥

शु० यजु० अध्याय ५ मंत्र २१ ।

विष्णोर्रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा ॥ ३ ॥

यजु० अध्याय १४ मंत्र २० ।

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ ४ ॥

यजु० अध्याय ३६ मंत्र १७ ।

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शांतिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शांतिरेधि ॥ ५ ॥

यजु० अध्याय ३० अनुवाक १ मंत्र ३ ।

विश्वानिदेवसवितर्दुरितानिपरासुव ।
यद्भद्रन्तन्नऽआसुव ॥ ६ ॥

यजु० अध्याय १६ अनुवाक ७ मंत्र ४८ ।

इमारुद्रायंतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमती ॥ यथा शमसंद्विपदेचतुष्पदे विश्वंम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ७ ॥

यजुर्वेद अध्याय २ मंत्र १२ ।

एतन्तेदेवसवितर्यज्ञम्प्राहुर्बृहस्पतयेब्रह्मणे ॥ तेनयज्ञमवतेनयज्ञपतिन्तेनमामव ॥ ८ ॥

यजुर्वेद अध्याय ३ मंत्र १३ ।

मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳसमिमन्दधातु
विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ।

एषवैप्रतिष्ठानामयज्ञोयुत्रैतेनयज्ञेनयु-
ञ्जन्ते सर्वमेव प्प्रातिष्ठितंभवुति॥ॐ३मू९॥

यजुर्वेद अध्याय २३ मंत्र १९ ।

गुणानान्त्वा गुणपतिꣳहवामहे प्प्रियाणा
न्त्वाप्प्रियपतिꣳहवामहे निधीनान्त्वा नि
धिपतिꣳहवामहे वसोवम आहमजानिग
र्ब्भुधमात्वमजासिगर्ब्भुधम् ॥ १० ॥

शुक्लयजु० अध्याय १६ मंत्र २५ ।

नमोगुणेभ्यो गुणपतिभ्यश्ववोनमोनमो
व्रातेभ्यो व्रातपतिभ्य श्ववो नमोनमोगृ-
त्सेभ्योगृत्सपतिभ्यश्ववो नमोनमोवि-
रूपेभ्योविश्वरूपेभ्यश्ववोनम÷ ॥ ११ ॥

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।

---

१ यह मंत्र ब्राह्मणका है ।

द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥
श्रीगणपतये नमः ॥

इति स्वस्तिवाचनम् ।

भा० टी०—यह स्वस्तिवाचनका अर्थ आगे विवाहप्रकरणके आदिमें लिखा है इसलिये पिष्टपेषण नहीं करते । [मनोजूति इसका अर्थ] अति वेगयुक्त मेरा मन आज्यको सेवन करे इस यज्ञको बृहस्पतिजी विस्तृत करें तथा अरिष्टको तथा इस यज्ञकी पुष्टि करें। और विश्वदेवा १३ नाम देवगण यहां आनंदसे मग्न होवे वा मदयुक्त होवे। [सुमुखश्चेति] यह १२ द्वादश गणेशजीके नाम विद्याके प्रारंभ तथा विवाहमें प्रवेश निर्गम संग्राम संकट अर्थात् जहां भीति हो वहां लेनेसे विघ्नादि सर्व उपद्रव शान्त होते हैं इस लिये आदिमें गणपतिपूजन यथोक्त करना चाहिये ॥

अथ ततः संकल्पः ।

ॐ तत्सद्य ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे जंबुद्वीपे भरतखंडे आर्यावर्ते वर्तमानकलियुगप्रथमचरणे वैवस्वतमन्वंतरे अष्टाविंशतितमे युगेऽमुकऋतौ अमुक-

मासेऽमुकपक्षेऽमुकतिथौ अमुकवासरान्वितायां अमुककरणनक्षत्रयोगयुक्तायां श्रुतिस्मृतिपुराणोक्तफलावाप्तिकामः धर्मार्थकाममोक्षार्थं मनोभिलषितप्राप्तये अमुकगोत्रोऽमुकशर्माऽहममुककर्मनिमित्तककात्यायनीशान्तिमहंकरिष्ये । तन्निर्विघ्नपरिसमाप्तयेगणपतिपूजनं च करिष्ये इति ॥

भा० टी०—संकल्पमें यथावत् संवत्सरादि नामादि उच्चारण करने चाहिये । और शर्मके स्थान क्षत्री बर्मा यह पद कहे और वैश्य गुप्त यह पद कहे । प्रमाण—" शर्म ब्राह्मणस्य बर्म क्षत्रियस्य गुप्तेति वैशस्य " गृह्यसूत्र १ कांडमें ॥

अथ गणपतिपूजनम् ॥ ॐ गणानां त्वा गणपति ँ हवामहे इति मंत्रेण । ॐभूर्भुवः स्वःभगवन् गणपतिदैवत इहागच्छ इह तिष्ठ सुप्रतिष्ठ वरदो भव मम पूजां गृहाण ॥ पाद्यादिभिरर्चयेत् । भगवन् गणपतिदेव एतत्पाद्यादिभिर्गंधाक्षतादिभिश्च पूजितः प्रसन्नो भव ॥ पुनः । वक्रतुंड महाकाय कोटिसूर्यसमप्रभ । अविघ्नं कुरु मे देव सर्वका-

येषु सर्वदा ॥ इति । अथ पंचोपचारपूज-
नम् ॥ आवाहयाम्यहं देवमोंकारं परमेश्व-
रम् । त्रिमात्रं त्र्यक्षरं दिव्यं त्रिपदं च त्रिदै-
वकम् ॥ त्र्यक्षरं त्रिगुणाकारं सर्वाक्षरमयं
शुभम् । त्र्यणवं प्रणवं हंस स्रष्टारं परमेश्व-
रम् ॥ अनादिनिधनं देवमप्रमेय सनात-
नम् । परं परतरं बीजं निर्मलं निष्कलं शुभम् ॥

भा० टी०—गणानां त्वा इस मंत्रसे गणपतिका पूजन करे और प्रार्थना करे हे भगवन् गणपति देव ! यहां आओ और बैठो वरको देवो और पूजाको ग्रहण करो । पाद्य अर्घ आच-मनीय इत्यादिसे आगे लिखे षोडश उपचारसे पूजन करे । इस प्रकार ओंकारके मंत्रोंसे ओंकारका पूजन करना ॥

शुक्लयजुर्वेद अध्याय २२ अनुवाक ७ मंत्र २२

ॐ आब्ब्रह्मन्ब्राह्मणो ब्ब्रह्मवर्च्च-
सीजायतामाराष्ट्रेराजन्यः शूरइषव्योति
व्याधीमहारथो जायतान्दोग्ध्री धेनुर्वो
ढानड्वानाशुः सप्तिः पुरन्धिर्य्योषाजिष्णू
रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो

जायतान्निकामेनिकामेनः पुर्ज्जन्यौवर्षतु फलवत्योनुऽओषधयः पच्यन्तान्योगक्षेमोनः कल्पताम् ॥

भा०टी०-(मंत्रार्थ) हे ब्रह्मन् हे ब्रह्माजी ! आपकी कृपासे यज्ञको करना कराना पढना पढाना दान लेना देना इत्यादि षट्कर्म करनेवाले और ब्रह्मतेजवाले ब्राह्मण होवे । और हमारे राष्ट्रमें क्षत्री व्याधि कातरसे रहित शूरवीर महारथ इस यजमानके हो । और इस यजमानकी दुग्ध देनेवाली गौ होवें और शीघ्र गमनवाले घोडे और सुंदर रूपवाले होवें । और पुरुष रथमें बैठनेवाले युवा सभायोग्य इस यजमानके संबंधी पुत्रादि होवे और हमारी प्रार्थनासे वृष्टि हो और फलयुक्त ओषधियां पकें हमारेको योग क्षेम होवें ॥

अथ रक्षाविधानम्.

शुक्लयजु० अध्याय ३ मंत्रः ३० ।

ॐ मानुःशꣳसोअररुषो धूर्तिःप्रणङ्मर्त्यस्य । रक्षाणोब्रह्मणस्पते ॥

यजु० अध्याय ३४ मंत्र ५२ ।

ॐ यदाबध्नन्दाक्षायणाहिरण्यꣳ शतानीकाय सुमनस्यमानाः । तन्मऽआबध्ना

मिशुतशारदायाऽऽयुष्माञ्जरदष्टिर्यथा सम् ॥ इति पठन् ॥

भा० टी०—(मानःश० स) हे ब्रह्मण्य ! ते हमारे अनिष्ट-चिन्तक परंतु मारनेमें असमर्थ हमारे शत्रुकी धूर्ति नाम हिंसा आप मत करें किंतु हमारी रक्षा करें अर्थात् असमर्थ शत्रुका क्या मारना वह आगे मृत होता है (यदाबध्नन्) दक्षकी संतान जो सुवर्ण शतानीक अर्थात् बहुत सेनायुक्त राजाको बान्धते भये प्रसन्न चित्त होकर शतजीवनके लिये तिस प्रकार जैसे वृद्धावस्थाको प्राप्त होवें तद्वत् बांधते हैं ॥

अथ मातृकापूजनम्.

गौरी १ पद्मा २ शची ३ मेधा ४ सावित्री ५ विजया ६ जया ७ । देवसेना ८ स्वधा ९ स्वाहा १० मातरो ११ लोकमातरः १२ ॥ हृष्टिः १३ पुष्टि १४ स्तथा तुष्टि १५ स्तथा-त्मकुलदेवताः १६ ॥ श्रीकुलदेव्यंतर्गतगौर्य्यादिषोडशमातृभ्यो नमः ॥ अथ ऋत्विजां वरणम् ॥ यथा चतुर्मुखो ब्रह्मा सर्ववेदधरः प्रभुः । तथा त्वं मम यज्ञेऽस्मिन्ब्रह्मा भव द्विजोत्तम ॥ गृहीत्वा तु कराङ्गुष्ठं यजमानः

पठेदिदम् ॥ अस्य कर्म्मणः प्रतिष्ठापनार्थं त्वं ब्रह्मा भव । अहं भवामि ब्रह्मा ब्रूयात् ॥

भा० टी०–गौरीसे आदि षोडश १६ मातृका भिन्न भिन्न अंक देकर मूलमें लिखी है । उनकी यथावत् षोडशोपचार पूजा करनेसे यह सन्तुष्ट होकर शुभको विधान करती हैं । ऋत्विक् होता आचार्य ब्रह्मादि वरणमें प्रथम ब्रह्माका वरण होता है अर्थ–जैसे चतुर्मुख सम्पूर्ण वेदविद्याके जाननेवाले ब्रह्माजी हैं तद्वत् आप मेरे यज्ञमें ब्रह्मा होवें यह कह हस्तका अंगुष्ठ पकडकर यजमान इस कर्मकी प्रतिष्ठाके लिये आप ब्रह्मा हो । होता है यह ब्रह्मा कहै ।

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन्नाचार्यस्त्वं भव प्रभो ॥ गृहीत्वा तु करांगुष्ठं यजमानः पठेदिदम् ॥ अस्य कर्मणः प्रतिष्ठापनार्थं त्वं आचार्यो भव । अहं भवामि ॥ ऋग्वेदः पद्मपत्राक्षो गायत्र्यः सोमदैवतः । अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ गृहीत्वा तु करांगुष्ठं यजमानः पठेदिदम् ॥ अस्य कर्मणः प्रतिष्ठापनार्थं ऋग्वेदी भव । अहं भवामि ॥

भा० टी०–जैसे स्वर्गमे इंद्रादिकोंका आचार्य (गुरु) बृहस्पतिजी हैं तद्वत् आप मेरे यज्ञमें आचार्य होवें ' गृहीत्वा तु ' इसका पूर्वोक्त अर्थ है यदि कोई कहे कि आचार्यको गुरु कैसे कहते हैं ? उत्तर–जो उपनयन कर शोचता और वेदविद्या पढाता इसको आचार्य अर्थात् गुरु कहते हैं प्रमाणभी यास्कजीने निरुक्तमें लिखा है " आचार्यः कस्मादाचार्य आदावाचारं ग्राहयित्वा विनात्यर्थान् " याज्ञवल्क्यजीभी लिखते है " उपनीय दद्द्वेदमाचार्यः स उदाहृतः । " इस प्रकार ऋग्वेदादिक चार वेदोंका वरण जानना । ऋग्वेदका स्वरूप पद्मपत्रवत् नेत्र, गायत्री छंद, सोम देवता, अत्रि गोत्र इत्यादि ॥

कातराक्षो यजुर्वेदस्त्रिष्टुभो ब्रह्मदैवतः । भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ गृहीत्वा तु करांगुष्ठं यजमानः पठेदिदम् ॥ अस्य कर्मणः प्रतिष्ठापनार्थं त्वं मे यजुर्वेदी भव । अहं भवामि ॥ सामवेदस्तु पिङ्गाक्षस्त्रिष्टुभो विष्णुदैवतः । काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥ गृहीत्वा तु करांगुष्ठं यजमानः पठेदिदम् ॥ अस्य कर्मणः प्रतिष्ठापनार्थं त्वं सामवेदी भव । अहं भवामि ॥

भा० टी०-कायरता युक्त नेत्र त्रिष्टुप् छंद, ब्रह्म देवता भारद्वाज गोत्र इत्यादि यजुर्वेदका स्वरूप है । और पिंगलवर्ण नेत्र त्रिष्टुप् छंद विष्णु देवता कश्यप गोत्र इत्यादि सामवेदका स्वरूप छंदादिक है ॥

अथाशीर्वादः ।

ऋग्वेदस्तु यजुर्वेदः सामवेदो ह्यथर्वणः ।
ब्रह्मवाक्यैश्च नैर्नित्यं हन्यंतां तव शत्रवः ॥
अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः ।
अधनाः सधनाः सन्तु सन्तु सर्वार्थसाधकाः ॥
विप्रहस्ताच्च गृहीयाद्यज्ञपुष्पफलाक्षतान् ।
चत्वारस्तववर्द्धन्तामायु कीर्तिर्यशो बलम् ॥
अथ कलशपूजनम् ॥ ॐऋग्वेदाय नमः यजुर्वेदाय नमः सामवेदाय नमः अथर्ववेदाय नमः कलशाय नमः वरुणाय नमः रुद्राय नमः समुद्राय नमः गंगायै नमः । यमुनायै नमः सरस्वत्यै नमः कलशकुंभाय नमः ॥

भा० टी०-ऋक् यजु साम अथर्वण यह ४ वेद ब्रह्मवाक्य पुराणादिसहित तुमारे शत्रुओंको नष्ट करें । और जिनके पुत्र नहीं वह पुत्रयुक्त हों और पुत्रोंवाले पौत्रोंसे युक्त हों । निर्धन धनवान् हो धनवान् संपूर्ण कामना सिद्ध करनेवाले हों । यज्ञके

ब्राह्मणके हाथसे पुष्प फल अक्षत ग्रहण करे ४ वस्तु आयु १ कीर्ति २ यश ३ बल ४ वृद्धिको प्राप्त हो ॥

ब्रह्मणा निर्मितस्त्वं हि मंत्रैरेवामृतोद्भवः ।
प्रार्थयामि च त्वां कुंभ वाञ्छितार्थं तु देहि मे ॥

शुक्लयजु० अध्याय ४ मंत्र ३६ ।

वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥

भा० टी०—(वरुणस्योत्तंभनमसि) हे शम्ये ! तुम वरुणके जलकी स्तंभन करनेवाली है और वरुणकी तुम शिथिल शम्या होवे और वरुणके सत्य स्थानमें हो और वरुणके सत्य स्थान होनेसे आप यहां स्थित होवें । यह वेदमंत्रार्थ है कि ब्रह्माजीने अमृतोद्भव मंत्रोंसे आपको रचा और हम आपकी प्रार्थना करते हैं कि हमारेको वांछित अर्थ देवे ॥

अथ वास्तुपूजा.

अथातः संप्रवक्ष्यामि यदुक्तं वास्तुपूजनम् ।
येन पूजाविधानेन कर्मसिद्धिस्तु जायते ॥
अनंतं पुण्डरीकाक्षं फणाशतविभूषितम् ।
विद्युद्बन्धूकसाकारं कूर्मारूढं प्रपूजयेत् ॥

शुक्लयजु० अध्याय १३ मंत्र ६ ।

ॐनमोऽस्तु सर्प्पेभ्यो येकेचं पृथिवीमनु । येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्योन- मः ॥ वासुक्याद्यष्टकुलनागेभ्यो नमः ॥

भा० टी०—इसके अनंतर वास्तुपूजा लिखते हैं जिसके करनेसे कर्मोंकी सिद्धि होती है । यह कर्मका अंग है कमल- सदृश नेत्रवाला और शतफणोंसे सुशोभित विद्युत्कांतियुक्त कूर्मदेवपर स्थित अनंत (शेष) की पूजा करे । (नमोस्तु मंत्रार्थः) जो पृथ्वीमें रहते हैं और जो आकाशमें तथा स्वर्गमें सर्प रहते हैं तिन्ह संपूर्णोंके लिये यह प्रणाम हो और वह रक्षा करे यह फलितार्थ है ॥

अथ योगिनीपूजा ।

ॐ आवाहयाम्यहं देवीं योगिनीं परमेश्व- रीम् । योगाभ्यासेन संतुष्टा परध्यानसम- न्विता ॥ १ ॥ दिव्यकुण्डलसंकाशा दिव्य- ज्वाला त्रिलोचना । मूर्तिमती ह्यमूर्त्ता च उग्रा चैवोग्ररूपिणी ॥ २ ॥ अनेकभावसं- युक्ता संसारार्णवतारिणी । यज्ञं कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातरः ॥ ३ ॥

दिव्ययोगी महायोगी सिद्धयोगी गणेश्वरी । प्रेताशी डाकिनी काली कालरात्री निशाचरी ॥ ४ ॥ हुंकारी सिद्धवेताली खर्परी भूतगामिनी । ऊर्ध्वकेशी विरूपाक्षी शुष्कांगी मांसभोजनी ॥ ५ ॥ फूत्कारी वीरभद्राक्षी धूम्राक्षी कलहप्रिया । रक्ता च घोरा रक्ताक्षी विरूपाक्षी भयंकरी ॥ ६ ॥ चौरिका मारिका चंडी वाराही मुण्डधारिणी । भैरवी चक्रिणी क्रोधा दुर्मुखी प्रेतवासिनी ७॥ कालाक्षी मोहिनी चक्री कंकाली भुवनेश्वरी। कुण्डला तालकौमारी यमदूती करालिनी ८॥ कौशिकी यक्षिणी यक्षी कौमारी यंत्रवाहिनी । दुर्घटे विकटे घोरे कपाले विषलंघने ॥ ९ ॥ चतुःषष्टिः समाख्याता योगिन्यो हि वरप्रदाः । त्रैलोक्ये पूजिता नित्यं देवमानुषयोगिभिः ॥ १० ॥ इति ॥

भा० टी०—परब्रह्ममें खचित योगाभ्यासकर संतुष्ट परमेश्वरी देवी श्रीयोगिनीका आवाहन करते हैं । कुंडलोंसे युक्त तेज त्रिनेत्रयुक्त मूर्तिवाली और मूर्तिसे रहित भयानक इत्यादि

अनेक भावोंसे संयुक्त संसाररूपी समुद्रके पार उतारनेवाली योगिनी माता इस यज्ञको विघ्नरहित करे और हमारेको कल्याण देवे । यह ६४ योगिनी संकटमें विपत्तिमें अर्थात् जहां भीति हो वहां स्मरण की हुई वरको देती संकट दूर करती हैं इस कारण देव मानुष योगिजनोंकर यह पूजनीय हैं अर्थात् संपूर्ण जगत् इनकी पूजा करता है ॥ १–१० ॥

अथ ब्रह्मपूजा.

शु० यजु० अध्याय १३ मंत्र ३ ।

ब्रह्म यज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनआवः ॥ सबुध्न्या ऽउपमा ऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ इति पाद्यादिभिर्ब्रह्माणमर्चयेत् ॥

भा० टी०–[मंत्रार्थ ब्र०] ब्रह्म सर्वव्यापी सूर्य प्रथम पूर्वदिशामें उदय होता है फिर अपने प्रकाशसे चारों तरफ मध्यवर्ती प्रकाश करता है वह प्रकाशमान लोक वेन मेधावी आदित्य दिशाओंसे जाना जाता है इस विद्यमान जगत्का अधिष्ठाता है और अमूर्त अदृश्यमान जगत्का कारण है । अर्थात् सूर्य भगवान्ही संपूर्ण लोकोंको दिशाको प्रकाश करता है ॥

अथ विष्णुपूजा.

यजु० अध्याय ५ मंत्र २१ ।

ॐ विष्णो॑रराटमसि विष्णो॑श्श्नप्त्रे॑स्थो विष्णो॒स्यूर॑सि विष्णो॑र्ध्रुवो॑ऽसि । वै॒ष्णवम॑सि विष्णवे॑ त्वा ॥

भा० टी०—(विष्णोरराटमसि) इसका अर्थ आगे-शांतिपाठमें लिखा है । इति विष्णुं पाद्यादिभिरर्चयेत् ॥

अथ शिवपूजा.

शुक्लयजुर्वेद अध्याय १६ मंत्र ४१ ।

ॐ नम॑ः शम्भवाय॑ च मयोभवाय॑ च नम॑ः शङ्करा॑य च मयस्करा॑य च नम॑ः शि॒वाय॑ च शि॒वत॑राय च ॥

भा० टी०—(नमः शंभवेति) शमके देनेवाले तथा सुख कल्याणादि गुण देनेवाले शंकरजीको नमस्कार है । इति शिवं पाद्यादिभिरर्चयेत् ॥

अथेंद्रपूजा.

यजु० अध्याय २० मंत्र ५० ।

ॐ त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्र॒ꣳ हवे॑हवे सु॒हव॒ꣳ शूर॒मिन्द्र॑म् । ह्वया॑मि श॒क्रं पु॑

स्हूतमिन्द्रं २७ स्वस्तिनोमुघवा धात्वि-न्द्रः॥ ॐ इन्द्राय नमः इति पूजयेत् ॥

भा० टी०—[त्रातारमिंद्र०] रक्षा करनेवाला जिससे इंद्र-जीको कहते हैं बुलानेमें शोभन शूरवीर वह इंद्र हम करके बुलाया भया न नष्ट होनेवाला धन और स्वस्ति हमारेको देवे हम प्रार्थना करते हैं ॥

अथ वायुपूजा.

यजु० अध्याय २७ मंत्र ३२ ।

वायोयेते सहस्त्रिणो रथासुस्तेभि रागंहि । नियुत्वान्त्सोमं पीतये ॥

यजु० अध्याय ९ मंत्र ७ ।

ॐ वाता वामनो गन्धर्वाः सप्त विंशतिः ॥ ते अग्रेश्वंमयुञ्जँस्तेऽस्मिन् जवमादधुः ॥ ॐ वायवे नमः ॥ इति पूजयेत् ॥

भा०टी०—(वायो येते०) हे वायुदेव ! जो तुमारे सहस्र-संख्यक रथ सदृश रथ है उनसे युक्त होकर आप सोमपानके लिये आओ हम प्रार्थना करते हैं ॥

अथ धर्मपूजा,

यजुर्वेद अध्याय ३ मंत्र १८ ।

ॐ अग्ने सपत्न दम्भनु मर्दऽधासोअ दाभ्यम् । चित्रावसो स्वस्तिते पारमं शीय ॥ धर्मायनमः ॥ इतिपू० ॥

भा० टी०—(अग्ने सपत्न०) हे भगवन् अग्निदेव ! तुम शत्रुओंको नाश करनेवाले हमारेको न हिंसन करते हमारी वृद्धि करे । हे चित्रावसो ! हे रात्रि ! न नाश होनेवाली कल्याण देवे। " रात्रिर्वै चित्रावसुरिति " श्रुतिः । और तुम्हारे पारको सुखपूर्वक प्राप्त होया करे ॥

अथ यमपूजा.

शु० यजु० अध्याय० २९ मंत्र १४ ।

ॐ असियमो अस्यादित्यो अर्वन्नसि त्रितोगुह्येन व्रतेन । असिसोमेन समयाविपृक्त आहुस्तेत्रीणिदिवि बन्धनानि ॥ इति यमपूजा दक्षिणे कार्या ॥

अथ नवग्रहपूजा.

शु० यजु० अध्याय ३४ मंत्र ३१ ।

ॐ आकृष्णेन रजसावर्तमानो निवे

शयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन सविता रथे नादेवो याति भुवनानि पश्यन् ॥ ॐ सूर्याय नमः । इति सूर्यं पूजयेत् ॥

भा० टी०-(आकृष्णेनेति) सूर्य देव रात्रिरूप रजसे वर्तमान वारंवार भ्रमण करता तथा अपने २ स्थानमें देवताओंको अमृत मनुष्यादिकोंको अन्न देता हुआ सुवर्णके रथसे १४ भुवनोंको देखता भया और आरोग्य देता भया फिरता है उदय होता है ।

शुक्लयजु० अध्याय १० मंत्र १८ ।

इमं देवाऽअसपत्नꣳसुवद्ध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोमी राजा सोमोस्माकम्ब्राह्मणानाꣳ राजा ॥ ॐ सोमाय नमः इति पू० ॥

भा० टी०-(इमं देवा०) देवो दानादिति हे दानशील पुरुषो ! तुम इस चंद्रमाको शूरवीरताके लिये ज्येष्ठता राज्य ऐश्वर्यादिके लिये अमुक पुत्र इसकी सेवा करो यह चंद्रमा

इम ब्राह्मणोंका राजा है । श्रौतार्थमें हे देवताओ ! यह संबंध करना ॥

शुक्लयजु० अध्याय ३ मंत्र १२ ।

अग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथि व्याऽ अयम् ॥ अपाᳬरेताᳬसि जिन्वति ॥ ॐ अंगारकाय० इति पूति पू० ॥

भा० टी०-(अग्निर्मूर्द्धा) हे अग्निस्वरूप वा अग्नितत्त्वमंगल देव ! स्वर्ग आकाशमें सूर्यरूप होकर मूर्द्धवर्ति हो और ककुत् बडे तेजस्वी और पृथिवीके पुत्र हो और तुमही जल वृष्टि रेतोत्पत्तिमें कारण हो । श्रौतार्थमें अग्निस्तुतिमें विनियुक्त है प्रमाण बृहज्जातके " शिखीभृखपयोमरुद्गणानां वशिनो भूमिसुतादयः क्रमेण " ॥

यजु० अध्याय १५ मंत्र ३ ।

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सᳬसृजेथामयञ्च ॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत ॥ ॐ बुधाय नमः ॥ इ० पू० ।

भा० टी०-(उद्बुध्यस्व०) हे बुधदेव ! अग्निवत् प्रकाशमान आप प्रसन्न होके आपकी प्रसन्नतासे यह यजमान इष्ट

मनोरथको प्राप्त होवे और इस लोकमें ऐश्वर्यादि भोग उत्तर-लोकमें देवताओंके साथ निवास करे यह हम प्रार्थना करते हैं श्रोतमें अग्नि ॥

यजु० अध्याय २६ मंत्र ३ ।

बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासु द्रविणन्धेहि चित्रम् ॥ ॐ बृहस्पतये नमः इ० ॥

भा० टी०–(बृहस्पते०) हे बृहस्पति देव ! अतिशयसे धन अर्थ स्वामिता अर्ह पूजा यज्ञ करनेवाले पुरुषमें धारण करे और बलसे जो रक्षा करनेवाले तथा सत्यसे हैं उत्पत्ति जिनकी वा सत्य प्रजावाले पुरुषोंको अनेक प्रकार चित्र विचित्र धन देवे यह प्रार्थना करते हैं ॥

यजु० अध्याय १९ मंत्र ७५ ।

ॐ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः । ऋतेन सत्यमिन्द्रियविपानꣳ शुक्रमन्धस इन्द्रस्येन्द्रियमिदम्पयोऽमृतम्मधु ॥ ॐ शुक्राय नमः इति० ॥

भा० टी०—(अन्नात्परिस्रुतो०) हवि लक्षणरूप अन्नका परिस्रुत रस त्रयी लक्षण ब्रह्मसे व्याप्त और क्षत्रसे व्याप्त सोम प्रजापतिसंबंधि पय इस सत्यसे युक्त इन्द्रकी इंद्रिय अन्न यह शुक्रजीके संबंधसे युक्त हो यह प्रार्थना करते हैं ॥

यजु० अध्याय ३६ मंत्र १२।

शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये शँय्योरभिस्रवंतुनः ॐशनैश्चराय नमः॥ इति पूजयेत्॥

भा० टी०—(शन्नोदेवी०) सुखरूप हमारे कल्याणकारक देवस्वरूप रोगके विनाशके लिये भयके दूर करनेके वास्ते शनिदेवकी स्तुति और प्रार्थना करते हैं। श्रौतमें वरुणसंबंधी स्तुत्यमन्त्र है ॥

यजु० अध्याय १९ मंत्र ३९।

कयानश्चित्र ऽआभुवदूतीसदावृधःस खा। कयाशचिष्ठयावृता॥ ॐ राहवे नमः इति पूजयेत॥

भा० टी०—(कयानश्चित्र०) हे राहु देव ! किस आग-

१ यह मैंने उवटभाष्यसे संक्षिप्त अर्थ लिखा है विशेष अर्थ ब्राह्मणसर्वस्वसे आगे लिखा देख लेंगे।

तुम हमारेको आनंद करते हैं और किससे हमारेको धन देते हैं वह हम उपाय करें । पूजा इति शेषः । श्रौतमें इंद्र ॥

यजु० अध्याय २१ मंत्र ३ ।

केतुङ्कृण्वन्नकेतवे पेशोमर्या अपेशसे ॥ समुषद्भिरजायथाः ॥ ॐ केतवे नमः ॥ इति पूजयेत् ॥

ॐ ब्रह्मा मुरारिस्त्रिपुरांतकारी भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शांतिकरा भवन्तु ॥ इति नवग्रहपूजा ॥ त्र्यंबकं यजामहे इति त्र्यंबकपूजनम् ॥ अथ कुशकाण्डिकाप्रारम्भः ॥ ततो होमार्थं चतुरंगुलोच्छ्रितहस्तमात्रपरिमितां वेदीं कुर्यात् कुशैः परिसमुह्य तान् कुशान् ऐशान्यां परित्यज्य गोमयोदकेनोपलिप्य खादिरेण स्रुवेण चोल्लेखनं हस्तेनोद्धरणं जलेनाभ्युक्षणं कांस्यपात्रयुगलेन लौकिकं निर्मथितं वाग्निमानीय स्थापयेत् । ततः पुष्पचंदनतांबूलवासांस्यादाय ॥ ॐ अद्य कर्तव्यामुकशान्तिहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकश-

र्माणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहं वृणे इति ब्राह्मणं वृणुयात् । ॐ वृतोस्मीति प्रतिवचनम् । तथाविहितं कर्म कुर्वित्याचार्येणोक्ते करवाणीति प्रतिवचनम् । ततोऽग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान्कुशानादायास्तीर्य्य अग्निप्रदक्षिणं कारयित्वाऽस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय भवानीति तेनोक्ते तदुपरि ब्रह्माणमुदङ्मुखमुपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् । ततः परिस्तरणम् । बर्हिषश्चतुर्थभागमादायाग्नेरीशानांतं ब्रह्मणोऽग्निपर्यन्तं नैर्ऋत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थालीसंमार्जनार्थं कुशत्रयं उपयमनार्थं वेणीरूपकुशत्रयं समिधस्तिस्रः स्रुवः आज्यं षट्पंचाशदुत्तराचार्यमुष्टिशतद्वयावच्छिन्नामतण्डुलपूर्णपात्रं ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सपवित्रकरेण प्रणीतोदकं

त्रिः प्रोक्षणीपात्रे निधाय अनामिकांगुष्ठाभ्यां पवित्रे उत्तराग्रे गृहीत्वा त्रिरुत्पवनं प्रोक्षणीपात्रं वामकरेणादाय । अनामिकांगुष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किंचित्त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीमभिषिच्य प्रोक्षणीजलेनासादितवस्तुसेचनं कृत्वाग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् आज्यस्थाल्यामाज्यं निरूप्याधिश्रयणं ततः कुशं प्रज्वाल्याज्योपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत्प्रक्षिप्य स्रुवं त्रिः प्रताप्य सम्मार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रताप्य दक्षिणतो निदध्यात् आज्यस्याग्नेरवतारणं तत आज्यं प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः प्रोक्षणीमुत्पूय तत उत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत् ॥ उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति ।

तत्तदाहुत्यनंतरं स्रुवावस्थितघृतशेषस्य प्रोक्षणीपात्रे प्रवेशः । अथ स्रुवपूजनम् ॥ ॐ आवाहयाम्यहं देवं स्रुवं शेवधिमुत्तमम् । स्वाहाकारस्वधाकारवषट्कार-समन्वितम् ॥ अष्टांगुलं त्यजेन्मूलमग्रे त्यक्त्वा दशांगुलम् । कर्तव्यं गोपदाकारं दंडस्याग्रे तु कंक-णम् ॥ विष्णोः स्थानं प्रगृह्णीयाद्धूयते च हुताशनम् । पद्मयोनिं समादाय होता सुखमवाप्नुयात् ॥ इति स्रुवपूजनम् ॥

भा० टी०—कुशकंडिका आगे विवाहमें स्पष्टार्थ लिखी है । इसलिये महाशयोंको उचित है कि विवाहप्रकरणमें देखे । और स्रुवको हस्तमें कंकण बंधकर पूजन करना ॥

अथ घृताहुतिः ॥ ॐ प्रजापतये स्वाहा इदं प्रजा-पतये इति मनसा ॥ ॐ इन्द्राय स्वाहा इदमिंद्राय० इत्याघारौ ॥ ॐ अग्नये स्वाहा इदमग्नये ० ॥ ॐ सोमाय स्वाहा इदं सोमाय० । इत्याज्यभागौ ॥ ॐ भूः स्वाहा इदं भूः । ॐ भुवः स्वाहा इदं भुवः । ॐ स्वः स्वाहा इदं स्वः । एता महाव्याहृतयः ॥

यजु० अध्याय २१ मंत्र ३ ।

ॐ त्वन्नो॑ऽअग्ने॒ वरु॑णस्य वि॒द्वान्दे॒व

स्यहेडो ऽ अवयासिसीष्ठाः । याजिष्ठो वह्नि- तमः शोशुचानो विश्वाद्वेषांसि प्रमु- मुग्ध्यस्मत्स्वाहा ॥ इदमग्नी वरुणाभ्यां० ॥

यजु० अध्याय २१ मंत्र ४ ।

ॐ सत्वन्नो ऽ अग्नेवमो भवोतीनेदि ष्ठो ऽ अस्या ऽ उषसो व्युष्टौ ॥ अवय- क्ष्वनो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नएधि स्वाहा ॥ इदमग्नये० ॥

पा० गृह्यसूत्रे ।

ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमि त्वमयाअसि ॥ अयानोयज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा ॥ इदमग्नये० ॥

पा० गृह्यसूत्रे ।

ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोअद्य सवितोत विष्णुर्विश्वे मुंचन्तु मरुतः स्वर्काः स्वाहा ।

इदं वरुणायसवित्रे विष्णवेविश्वेभ्योदेवे-भ्यो मरुद्भ्यः स्वर्केभ्यः० ॥

यजुर्वेद अध्याय २१ मंत्र १२ ।

ॐ उदुत्तमं वरुणपाशमस्मदवाधु मंविमध्यम ँ श्रथाय । अथावुय मादि त्यव्रते तवानागसो ऽअदितयेस्यामस्वाहा

इदं वरुणाय० । एताः सर्वप्रायश्चित्तसंज्ञकाः ॥ ॐ गणपतये स्वाहा इदं गणपतये० । ॐ विष्णवे स्वाहा इदं विष्णवे० । ॐ शम्भवे स्वाहा इदं शम्भवे० । ॐ लक्ष्म्यै स्वाहा इदं लक्ष्म्यै० । ॐ सरस्वत्यै स्वाहा इदं सरस्वत्यै० । ॐ भूम्यै स्वाहा इदं भूम्यै० । ॐ सूर्याय स्वाहा इदं सूर्याय० । ॐ चंद्रमसे स्वाहा इदं चंद्रमसे० । ॐ भौमाय स्वाहा इदं भौ० । ॐ बुधाय स्वाहा इदं बुधाय० । ॐ बृहस्पतये स्वाहा इदं बृहस्पतये । ॐ शुक्राय स्वाहा इदं शुक्राय० । ॐ शनैश्चराय स्वाहा इदं शनैश्चराय० । ॐ राहवे स्वाहा इदं राहवे० । ॐ

केतवे स्वाहा इदं केतवे० । ॐ व्युष्ट्यै स्वाहा इदं व्युष्ट्यै० । ॐ उग्राय स्वाहा इदमुग्राय० । ॐ शतक्रतवे स्वाहा इदं शतक्रतवे० । ॐ प्रजापतये स्वाहा इदं प्रजापतये० । इति मनसा प्राजापत्यं ॥ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते० । स्विष्टकृद्धोमः । ततः संस्रवप्राशनं आचमनं ततो ब्रह्मणे दक्षिणादानम् ॥

भा० टी०—त्वन्नोअग्ने १, सत्वन्नो अग्ने २, ये ते शतं ३, अयाश्चाग्ने ४, उदुत्तमं ५ यह पांच मंत्रोंका विवाहकी कुशकंडिकाके अन्तमें अर्थ लिखा है इसलिये पुनः पिष्टपेषण नहीं करते । और आगेके नामोक्त मंत्र २१ हैं इनमें सूर्यादि नव हैं । और प्रजापतये स्वाहा यह मंत्र मनमें उच्चारण करना और सर्व स्पष्ट मुखसे उच्चारण करने ॥

ॐ अद्य एतस्मिन् शांतिहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पात्रं प्रजापतिदैवतं अमुकगोत्रायामुकशर्मणे ब्रह्मणे दक्षिणां दातुमहमुत्सृजे ॥ ॐ स्वस्तीति प्रतिवचनम् । ततो ब्रह्मग्रंथिविमोकः ॥ ततः ॐ सुमित्रियानऽआपऽओषधयः संतु

इति पवित्राभ्यां जलमानीय तेन शिर सम्मृज्य ॐ दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः ॥ इत्यैशान्यां प्रणीतान्युब्जीकरणम् ॥

भा० टी०—आज इस शांतिके होमरूप कर्ममें करना वा न करना इसकी परीक्षारूप ब्रह्माके कर्मकी प्रतिष्ठाके लिये यह पूर्णपात्र प्रजापतिसंबंधी अमुक गोत्र ब्राह्मणको दक्षिणा देनेके लिये देता हूं । स्वस्ति ब्राह्मण कहे । कुशनिर्मित ब्रह्माकी ग्रन्थि खोल देनी । विवाहप्रकरणमें ब्रह्मादिकोंका लक्षण लिखा है ॥ " ९० पञ्चाशतो भवेद्ब्रह्मा " इत्यादि । और दुर्मित्रिया १ दुर्मित्रिया २ इन दोनों मंत्रोंका अर्थभी स्पष्ट विवाहप्रकरणमें लिखा है ॥

ततः स्तरणक्रमेण बर्हिरुत्थाप्य घृतेनाभिघार्य हस्तेनैव जुहुयात् ॥

यजु० अ० ८ । मं० २१ ।

ॐ देवागातुविदोगातुम्वित्वागातुमितमनसस्पतऽइमंदेवयज्ञ स्वाहावातेधाः स्वाहा ॥

इति बहिर्होमः। तत आचारात् दशदिक्पालेभ्यो दधिमाषबलिर्देयः क्षेत्रपालबलिदानं च॥ ततः स्थालीपाकादिपक्वान्नेन गणपतिप्रमुखसूर्यादिग्रहेभ्यस्तत्तन्मंत्रैर्बलिर्देयः ततो ब्राह्मणभोजनम्॥

भा०टी०—स्तरणक्रमसे कुशा ग्रहण कर घृत लगाय हाथसे हवन करे। 'देवागातु' इस मन्त्रसे। इसका अर्थ विवाहप्रकरणमें लिखा है फिर आचारसे दश दिक्पालोंको दधियुक्त माषोंकी बलि देनी दश दिक्पाल ये हैं। इंद्र १, वह्नि २, धर्मराज ३, नैर्ऋत, ४ वरुण ५, मरुत ६, कुबेर ७, ईश ८ और पृथिवी आकाशका स्वामी २। यह १० अनंतर स्थालीपाकसे पके हुए पकान्नसे श्रीगणेशजीसे आदि सूर्यादि नवग्रह ओंकार सर्प योगिनी अर्थात् जो २ पीछे स्थापन करे हैं उन्होंके मंत्रोंसे सबको बलिदान करना॥

ॐ अद्य करिष्यमाणब्राह्मणभोजनसांगतासिद्ध्यर्थमिदं दक्षिणाद्रव्यं तेभ्यो विभज्य दातुमहमुत्सृज ततो गुरवे दक्षिणा देया॥ ततः छायापात्रदानं तदनंतरं पूर्णाहुतिः तद्यथा स्रुवेण पूगीफलादिकं गृहीत्वा॥

यजु० अध्याय ७ मंत्र २४ ।

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरऽमृतऽआजातमुग्निम् । कविᳯसुम्म्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्तदेवाःस्वाहा ॥

ततः स्रुवेण भस्मानीय दक्षिणानामिकागृहीतभस्मना ॐ त्र्यायुषं जमदग्नेः । इति ललाटे । ॐ कश्यपस्य त्र्यायुषम् । इति ग्रीवायां । ॐ यद्देवेषु त्र्यायुषम् । इति दक्षिणबाहुमूले । ॐ तन्नो अस्तु त्र्यायुषम् । इति हृदि ।

भा० टी०—प्रथम संकल्प ब्राह्मणोंकी दक्षिणाका है । पीछे छायापात्र दान करना अनंतर फल पुष्प स्रुवमें स्थित घृतसे 'मूर्द्धानं' इस मंत्रसे पूर्णाहुति करनी । इस मन्त्रका अर्थ विवाहप्रकरणमें लिखा है ॥

यजमानपक्षे तन्नो इत्यस्य स्थाने तत्ते इति विशेषः । ततोऽभिषेकः । तच्चाम्रपल्लवकुशादिकेन कलशस्थजलमानीय आपोहिष्ठेत्या-

दिमंत्रेण यजमानमभिषिंचेत ॥ आचार्यादीनां दक्षिणा देया । ततो भूयसीं दद्यात् । ॐ आज्येन वर्द्धते बुद्धिराज्येन वर्द्धते यशः । आज्येन वर्द्धते आयुर्दर्शनं पापनाशनम् ॥ अथ विशेषपूजा ॥ ग्रहा गावो नरेंद्राश्च ब्राह्मणाश्च विशेषतः ॥ पूजिताः प्रतिपूज्यंते सावधाना भवन्तु ते । अथ अग्निविसर्जनम् ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥

भा० टी०—घृतसे बुद्धि बल यश आयु वृद्धिको प्राप्त होती है और पाप नष्ट होते हैं । आयुवृद्धिमें प्रमाण भावप्रकाश चिकित्साशास्त्रमें जैसे 'स्वमाननं ने पश्येद्यदीच्छेच्चिरजीवितुम्' ग्रह गौ ब्राह्मण राजा यह पूजन किये हुए विशेष फल देते हैं । 'गच्छ' इस मंत्रसे अग्निका विसर्जन करना ॥

आगतास्तु यथान्यायं पूजितास्तु यथाविधि । कृत्वा कृपां मयि देवा यत्रासंस्तत्र गच्छत ॥ यजमानहितार्थाय पुनरागमनाय च । शत्रूणां बुद्धिनाशाय मित्राणामुदयाय च ॥ यथा शस्त्रप्रहाराणां कवचं वारणं भवेत् । तद्वदेवा-

भिघातानां शांतिर्भवति वारणम् ॥ अथ ग्रहादीनां विसर्जनम् ॥ यान्तु देवगणाः सर्वे पूजामादाय मामकीम् । यजमानहितार्थाय पुनरागमनाय च ॥

ऋ० प्र० अष्टक अ १ मं० १ ।

ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं । होतारंरत्नधातमम् ॥

भा० टी०—भली भांति आये हुए और पूजन किये हुए मुझपर कृपा कर अपने २ स्थानको देवगण सिधारे यजमानकी कुशलताके लिये तथा फिर आनेके लिये। जैसे खड्गादि शस्त्रोंके प्रहारसे रक्षा करनेवाला कवच (संजोया) होता है. तद्वत् संपूर्ण विघ्नोंके दूर करनेके लिये शांति है । 'अग्निमीळे' यह मन्त्र ऋग्वेदके आदिका है ।

ॐ विष्णुस्तत्सदद्यामुकगोत्रोहममुकशर्माहं इदं सामिषं घृतपक्कं विष्णुदैवतं भगवद्विष्णुप्रीतये यथानामगोत्राय ब्राह्मणायाहं ददे । ॐ अद्य कृतैतत्सामिषघृतपक्कदानप्रतिष्ठासांगतासिद्ध्यर्थं विष्णुप्रीतये यथानामगोत्रब्राह्मणाय दक्षिणां दातुमहमुत्सृजे। ॐ अद्य

तत्सद्विवाहांगत्वेनेदमिष्टघृतपक्कं विष्णुदेवत-कुलदेवताप्रीतये सौभाग्यताप्राप्तये यथाना-मगोत्राय ब्राह्मणायाहं ददे । इति कन्यापक्षे ततः सुपूजितं कंकणबंधनं ततस्तिलकं कुर्यात् । तदनंतरं सूर्यायार्घ्यदानम् ॥ इति श्रीकात्यायनीशान्तिः समाप्ता ॥

भा० टी०—अमुक गोत्र ब्राह्मणको विष्णुप्रीतिके लिये घृतपक्क अन्न देता हूं और इसकी प्रतिष्ठाके लिये दक्षिणा देता हूं । कन्यापक्षमें सौभाग्यताके लिये यह पद कहना । फिर पूजन कर कंकण बंधना तिलक करना ॥

अथ शांतिसामग्री ।

मौली, गोला, पंचरंग, आटा, चावल, गुड, केशर, पुष्प, धूप, दीप, नैवेद्य, तांबूल, सुपारी ७, पतासे, मह्रिया, घुंगनिया, दालां ७, घृत, तैल, कुशा, स्रुव, पलाश समिधा, पटडी, यव, तिल, गोमय, बटना, कंकण, रेत, पत्र, ग्रहजप । इति ॥

इति श्रीकर्पूरस्थलनिवासिगौतमगोत्र (शौरि) अन्वयालं-कृतश्री अपारमहिमा० पं० घनैयारामसत्पुत्रवैकुण्ठपीठाधिष्ठित-श्रीतुलसीरामतत्पुत्रश्रीसकलजनवंद्यदैवज्ञदुनिचन्द्रतदात्मजशौ-र्यौदार्यधैर्याद्यालंकृताधीतवेदवेदांगधर्मशास्त्रादिश्रीपण्डितावि-ष्णुदत्तवैदिककृतकात्यायनीशांतिटीका आद्रवेदांकभूमिते १९४७ वैक्रमे माधवे मासि कृष्णदशम्यां चंद्रवासरे समाप्तिमगात् ॥

इति तृतीयं प्रकरणं समाप्तम् ॥ ३ ॥

अथ चतुर्थप्रकरणम् ।

ॐ स्वस्ति श्रीगणेशाय नमः ॥ ॐ वेदपुरुषाय नमः ॥ श्रीः ॥ अथ विवाहसामग्री लिख्यते ॥ आटा, गुड, चावल, मौली, गेला, केशर, पुष्प, नैवेद्य, मेवा, धूप, दीपअटे ७, सुपारिया ११, दूर्वा, चंदन, पुष्पमाला २, आम्रकेपत्र १००, पटडीया २, वेद १, चंदोया १, खारे २, वा चौकिया २, घृत, प्रणीतापात्र, प्रोक्षणीपात्र, कांस्यपात्र २, मधुपर्क, गौका दुग्ध, दधि, घृत, शहत, नालिकेर १, धोती, उपर्णा बालकनु, अर्घचौल, अंट्ट २ सिंधूरा, शूर्प १, लाजा अर्धशेर, जंडीके पत्र, शण, शंख, सुवर्ण, बांडे पानके २, पूर्णपात्र १, चावल अभिषेकके लिये गागर वा कुंभ वा कोरी १, समिधा पलाश वा बेरीकी १०, सेर वटना, शिलावट्टा, शर्करा, वहारी १, मालृगिरा ५, पर्णा १, कुशा, समवस्त्र गज ४, स्रुवा १, आसन २, अर्धा हलपजाली, मटिया ५ इति । अथ चतुर्थ दिनमें चतुर्थीकर्मकी सामग्री लिख्यते । आटा, गुड, मौली, चावल, केसर, धूप, दीप, नैवेद्य, सुपारिया ५, दूर्वा, आम्रपत्र १०, पटडीया २, चंदोया १, घृत, प्रणीता, प्रोक्षणी, अर्धचावल, पृथूदकपात्र, कुनाली १, हलपजाली, गोदुग्ध अर्धसेर, चावलपूर्णपात्र १, वस्त्रगज २०, सिंदूडांगा ४, शण, शंख, सुवर्ण, रेत, स्रुवा, कुशा, समिधा, चरुस्थाली इति चतुर्थीकर्मसामग्री ॥

१ अथ कन्योद्वाहे यजमानकर्तृकप्रतिज्ञासंकल्पः ।

ॐ विष्णुर्विष्णुर्विष्णुः अद्य ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतिमे युगे कलियुगे प्रथमचरणे अमुकसंवत्सरेऽमुकगोलेऽमुकायनेऽमुकपक्षेऽमुकमासेऽमुकतिथौ नक्षत्रकरणयोगयुक्तेऽमुकवासरे अमुकगोत्रोत्पन्नोऽहं जन्मनामतः प्रसिद्धनामतश्चामुकशर्माहं कृतकायिकवाचिकमानसिकसांसर्गिकज्ञानाज्ञातसमस्तदोषपरिहारार्थं श्रुतिस्मृतिपुराणोक्तफलावाप्तिकामः श्रीयज्ञपुरुषनारायणप्रीत्यर्थं तत्प्रसादात्कायवाङ्मनोभिर्महापातकादिदोषनिवृत्तिपूर्वकैहिकामुष्मिकेश्वरप्रसादानुरूपविभवयोगक्षेमप्राप्तये च अश्वमेधपुण्यजनकताकपुत्रीविवाहात्मकदानमहं करिष्ये तन्निर्विघ्नतासिद्धये यथोपलब्धोपचारद्रव्यैः गणपत्यादिनवग्रहपूजनमहं करिष्ये इति ॥ पश्चात् गणेशादिपूजनं कुर्यात् ॥

२. अथ यजमानकर्तृकशुभ्रचौलाधौतीपर्णानां दानसंकल्पः ।

अद्येत्यादि० पुत्रीविवाहकर्म्मणि कन्यादान-प्रतिपत्त्यर्थमादाविमानि चतुष्टयवस्त्राणि प-ट्टकार्पासादिसंपादितानि मांजिष्ठारिष्टादिना-नारंजितानि बृहस्पतिदेवतानि कन्यावरयो-र्वैवाहिकसमये परिधानयोग्यानि सदक्षिणानि अमुकगोत्रप्रवरायाऽमुकनामशर्मणे विष्णु-रूपिणे वराय तुभ्यमहं संप्रपदे ॥ इति शुभ्रचौलादिदानम् ॥

३ अथ कन्यापितृकर्तृकवेदीदानसंकल्पः ।

ॐ तत्सदद्येति० नानारागानुरूपयज्ञाधिष्ठा-तृपरमेश्वरादिविशेषणवतो भगवतः प्रीत्यर्थं तत्प्रसादात् याज्ञिकभूमिदानजन्यनानास्व-र्गादिफलप्राप्तये इमानि रजतमुद्रिकानि चंद्र-देवतानि सदक्षिणानि कन्यावैवाहिकचतुष्टय-वंशनिर्मितस्तंभवेदिकान्तरभूमिप्रतिनिध्या-त्मकानि यथा नामगोत्राय० इति वेदीदान-संकल्पः ॥

४ अथ यजमानकर्तृकचतुर्थीदानसंकल्पः ।

ॐ अद्येत्यादि० कृतैतत्पुत्रीविवाहचतुर्थीकर्मप्रतिष्ठार्थं सांगतासिद्ध्यर्थं चेमां रजतमुद्रिकां दक्षिणां चंद्रदैवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे० स्वस्तीति प्रतिवचनं सर्वत्र० इति चतुर्थीदानम् ॥

५ अथ यजमानकर्तृकउपाध्यायदक्षिणासंकल्पः ।

ॐ अद्येत्यादि० कृतैतदग्निष्टोमादिकृतसमपुत्रविवाहयोगमंत्रोच्चारणादिकर्तव्यताककर्म्मप्रतिष्ठार्थं साङ्गतासिद्ध्यर्थं चेदं द्रव्यं रजतं चंद्रदैवतं अमुकगोत्राया ऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥

६ अथ यजमानकर्तृककन्यायज्ञान्ते अन्नदान-
भूरिद्रव्यदानसंकल्पः ।

ॐ अद्येत्यादि० श्रीयज्ञपुरुषपरमेश्वरप्रीत्यर्थं तत्प्रसादादवगता ऽनवगतसकलदुरितोपदुरितशमनपुरस्सराक्षयफलावाप्तये च वरवध्वोः पूर्णायुरादिसुखसंपत्तिसिद्धये प्राजाप-

तिकं दास्यमानान्नं तथा भूरि द्रव्यं ताम्रं वा रजतं सूर्यदैवतं वा चंद्रदैवतं सदक्षिणं यथा २ नामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृजे ॥ इति कन्यापितृकर्तृकना- नाद्रव्यदानसंकल्पः ॥

७ अथ बालककर्तृकविवाहप्रतिज्ञासंकल्पः ।

ॐ तत्सदद्येति॰ जन्मलग्नतो वर्षलग्नतश्च तथा वैवाहिकलग्नतः खेटावेदितानिष्टफलानि- रसनोत्तरेष्टफलप्राप्तिपुरस्सरसकलकर्मसिद्ध्य- र्थं गार्हस्थ्यनानाकर्माधिष्ठानात्मकस्वविवा- हकर्माहं करिष्ये॰ तदंगत्वेन तन्निर्विघ्नतासि- द्ध्यर्थं आदौ गणपत्यादिनवग्रहपूजनमहं करिष्ये ॥ इति ॥

८ अथ पत्नीप्रतिग्रहगोदानसंकल्पः ।

ॐ तत्सदद्येत्यादि॰ श्रौतस्मार्तवैदिकेतिहा- सपुराणोक्तफलावाप्तिकामः श्रीपरमेश्वरना- रायणादिविशेषणाविशिष्टभगवत्प्रीत्यर्थं त- त्प्रसादात जन्मराशितो नामराशितश्च जन्मलग्नतो वर्षलग्नतश्च जन्यजननजानि-

ष्यमाणात्मकदोष ८ त्रयनिरसनोत्तरजन्मलग्नतो विवाहलग्नतश्चानिष्टखेटावेदिताशुभदुरितकर्मनिवृत्तये पत्नीपाणिग्रहणजन्यप्रतिग्रहविशेषताकपुरस्सरभार्यात्रिवर्गकरणमित्यनेन प्रतिपादितधर्मार्थकामप्रतिपत्तये चेमां गां सुवर्ण रजतवस्त्रैः यथाशक्त्यलंकृतां कांस्यदोहोपयुक्तां सवत्सां मुक्तालांगूलभूषितां सुशीलां रुद्रदैवतां अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ अथ दक्षिणासंकल्पः ॥ ॐ अद्य कृतैतत् गोदानप्रतिष्ठार्थमिदं द्रव्यं रजतं वा सुवर्णं चंद्रदैवतं वा अग्निदैवतं यथानामगोत्रायेत्यादि ॥

९ गोदानाभावे दक्षिणादानसंकल्पः ।

ॐ अद्येत्यादि सर्वं पूर्ववत्० इमां गां इत्यस्य स्थाने गोदानप्रतिनिधिभूतमिदं द्रव्यं अमुकदैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे दक्षिणा पूर्ववत् ॥

१० अथ उपाध्यायदक्षिणादानसंकल्पः ।

ॐ अद्येत्यादि० गतानवगतसकलदुरितोपद्रुतिक्षयपुरस्सरसकलत्रस्वशरीरकल्याणोत्तरपूर्णायुर-

दिसुखसंपत्तिसिद्धिकामः कृतेन जन्मादिदशसंस्कारांतर्गतस्वविवाहान्मकमहत्संस्कारमन्त्रोच्चारणकारयितव्यकर्तव्यताककर्म्मप्रतिष्ठार्थं च सांगतासिद्ध्यर्थमिमाममुकद्रव्यमयीमुपाध्यायदक्षिणां अमुदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे ॥ इति ॥

११ अथ विवाहे यजमानकर्तृकन्यादानसंकल्पः ।

तत्र कन्यापिता सपत्नीकः कृतनित्यक्रियः कृमिजवस्त्रपरिधानपूर्वकोत्तराभिमुखः आदौ गोधूमचूर्णेन गणपत्यादीन्विधाय स्वस्तिवाचनपूर्वकप्रतिज्ञासंकल्पं कुर्यात ॐ तत्सदद्येत्यादिदेशकालपूर्वकं श्रुतिस्मृत्याद्युक्तफलावाप्तिपुरस्सरावगतानवगतसकलदुरितमहापातकक्षयानन्तरज्ञाताज्ञातकृतकायवाङ्मनःकृतसमस्तपातकोपपातकजन्मत्रयोपार्जितपापक्षयकामः राजद्वारतो व्यवहारतश्च सुप्रतिष्ठितैश्वर्यसुखाप्तये च श्रीमद्भगवच्चरणारविंदप्रीतिजनककन्यादेहरोमसमसंख्याकल्पावच्छिन्नस्वर्गलोकवासजनककन्योद्वाहांगभूतविचित्रवर्णवस्त्राद्याभरणरीति

कांस्यलोहपैत्तलत्रपुसीसकमाषपिष्टपक्वान्नरजतसुव र्णरूप्याद्यनेकभूषणनाम्राद्यनेकद्रव्ययुक्तखट्वादान- महं करिष्ये ॥ ततः दक्षिणाशिरसमुत्तरपादां तूल- कोपधानादिपुरस्कृतां वस्त्राभरणपात्राद्यलंकृतां खट्वां वरकन्यारोहणपूर्वकां पूर्वदिक्पार्श्वे रक्तसू- त्रोपबद्धां कन्यापिता पत्न्या सह ग्रंथिबंधनं कृत्वा खड्वातंतुगंधाक्षतपुष्पजलैःसंकल्पं कुर्यात् । १२अथ ॐतत्सदद्येत्यादि देशकालौसंकीर्त्य०श्रुति स्मृतिपुराणेतिहासेत्यादिप्रतिपादितफलावाप्तिका मोवगतानवगतसकलदुरितोपदुरितक्षयकामश्चनाना पटतंतुसंख्यासमानेककल्पावच्छिन्नवैकुंठलोकप्राप्ति कामः श्रीलक्ष्मीनारायणप्रीतिजनकबहुश्वमेधयज्ञ- फलसूचकस्वीपुत्रीविवाहाङ्गभूतां इमां सतूल्योपधा- नादिसंस्कृतां खट्वां उत्तानांगिरोदैवतां बृहस्पतिदे- वताकसितरक्तपीताद्यनेकविधसुवर्णरजततंतुमिश्रि- तवस्त्रसंयुतां विश्वकर्मदैवताकैःयथापरिमितैः रीति- कांस्यलोहमयपात्रैः सपात्रतां चंद्राग्निसामुद्रदेवता- कअनेकविधविरचितरजतसुवर्णभूषणविभूषितां

प्रजापतिदैवताकविविधपक्वान्नाद्याधिकरणकां सूर्य-
चंद्रदैवताकयथापरिमितताम्ररजतमयैः द्रव्यैस्सद-
क्षिणाममुकगोत्राय अमुकप्रवरायामुकनाम्ने वराय
तुभ्यमहं संप्रददे ॥ स्वस्तीति प्रतिवचनं वरप्रत्युक्तिः
त्वा दक्षिणाभिन्नसंकल्पः ॐ अद्य कृतैतत्खट्वाप्रति-
ष्ठार्थमिदं ताम्ररजतद्रव्यं सूर्यचंद्रदैवतं अमुक० ॥
आचारात् कन्यादाता सकलत्रः जलेन वरकन्या-
सहितखट्वां सव्येन वेष्टनं कुर्यात् ततः सपत्नीको
यजमानः खट्वापश्चिमभागे पूर्वाभिमुखःसन् कन्या-
वराक्षिप्तधान्यानि गृही गृह्णीयात् सबांधवैः ॥ अथ
धान्यप्रक्षेपे मंत्रः ॥ ॐ विश्वामित्रो जमदग्निर्वसिष्ठो
गौतमस्तथा । कश्यपोऽत्रिर्भरद्वाजो विष्णुब्रह्माद-
यश्च ये । ते सर्वे त्वां प्रयच्छंतु धनधान्यादिसंपदम्
॥ १ ॥ ॐ सनकःसनंदनाद्यश्च धेनवो मातरस्तथा ।
देवाः सर्वे प्रयच्छंतु धनधान्यं सदा गृहे ॥ २ ॥
ॐ चिरं जीवतु मे माता चिरं जीवतु मे पिता ।
चिरं जीवतु मे भ्राता चिरं जीवंतु बांधवाः ॥ ३ ॥
ॐ दिवा रक्षतु सूर्योऽयं रात्रौ रक्षतु चंद्रमाः । वंशं

रक्षतु भौमश्च धनधान्यादिसंपदाम् ॥ ४ ॥ पितृवंशं बुधो रक्षेत् मातृवंशं गुरुस्तथा । बंधुवर्गं च रक्षेत्तु भृगुर्दैत्यपुरोहितः ॥ ५ ॥ अश्विन्यादीनि ऋक्षाणि योगा विष्कंभकादयः । तिथयः प्रतिपाद्याद्याः शुभं यच्छन्तु ते सदा ॥ ६॥ ॐ तेजोवृद्धिर्यशोवृद्धिर्वंशवृद्धिस्तथैव च । लोककीर्तिर्भवेत्तात धनधान्यं सदा गृहे ॥ ७ ॥ ॐ गंगाद्याः सरितः सर्वाः शोणाद्याश्च नदास्तथा । कृतं पापं प्रशाम्यंतु प्रयच्छन्तु सुखं च ते ॥ ८ ॥ ततो यजमानः सूर्यायार्घ्यं दद्यात् ॥ इति खट्वादानविधिः ॥

अथ गोत्रोच्चारणम् ।

ॐ श्रीमत्पंकजविष्टरो हरिहरौ वायुर्महेन्द्रोऽनलश्चंद्रो भास्करवित्तपालवरुणाः प्रेताधिपाद्या ग्रहाः॥ प्रद्युम्नो नलकूबरौ सुरगजश्चिंतामणिः कौस्तुभः स्वामी शक्तिधरश्च लाङ्गलधरः कुर्वंतु वो मङ्गलम् ॥ १ ॥ श्लोकान्ते गोत्रोच्चारणम् ३ । गौरी श्रीकुलदेवता च सुभगा भूमिः प्रपूर्णा शुभा सावित्री च च सरस्वती च सुरभिः सत्यव्रतारुंधती ॥ स्वाहा

जाम्बुवती च रुक्मभगिनी दुःस्वप्नविध्वंसिनी वेला चांबुनिधेः समीनमकरा कुर्वंतु वो मङ्गलम् ॥ २ ॥ गंगा सिंधुसरस्वती च यमुना गोदावरी नर्मदा कावेरी सरयू महेंद्रतनया चर्मण्वती वेदिका ॥ क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गंडकी पुण्याः पुण्यजलैः समुद्रसहिताः कुर्वंतु वो मङ्गलम् ॥ ३॥ लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वंतरिश्चंद्रमा धेनुः कामदुघा सुरेश्वरगजो रंभा च देवांगना ॥ अश्वः सप्तमुखो विषं हरिधनुः शंखोऽमृतं चांबुधे रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥ ॥ ४ ॥ ब्रह्मा वेदपतिः शिवः पशुपतिः सूर्यो ग्रहाणां पतिः शक्रो देवपतिर्हविर्हुतपतिः स्कंदश्च सेनापतिः ॥ विष्णुर्यज्ञपतिर्बलिः क्षितिपतिः शक्तिः पतीनां पतिः सर्वे ते पतयः सुमेरुसहिताः कुर्वन्तु वो मङ्गलम् ॥ ५॥ इति सर्वोपयोगिगोत्रोच्चारणम् ॥

इति श्रीगौतमान्वयालंकृत (शोरि) दैवज्ञसमार्यश्री-मुनिचंद्रसंगृहीतं संकल्पप्रकरणं समाप्तम् ।

अथ निबाहुरामटीकायां कन्यासंकल्पविधिः ।

हरिः ॐ ॥ विष्णुर्विष्णुर्विष्णुः पुनातु अद्य तत्स-
न्ब्रह्म अथानन्तवीर्यस्य श्रीमदादिनारायणस्याऽ-
चिन्त्यापरिमिताऽनंतशक्तिसमन्वितस्य स्वकीयमू-
लप्रकृतिपरमशक्त्या प्रक्रीडमानस्य सच्चिदानन्दस-
न्दोहस्वरूपे स्वात्मनि सर्वाधिष्ठाने स्वाज्ञानकल्पि-
तानां महाजलौघमध्ये परिभ्रम्यमाणानामनेककोटि-
ब्रह्माण्डानामेकतमेऽस्मिन् ब्रह्माण्डेऽव्यक्तमहदहङ्का
रपृथिव्यप्तेजोवाय्वाकाशादिभिर्दशगुणोत्तरैरावरणै-
रावृते आधारशक्तिश्रीकूर्मवराहधर्मानन्ताष्टदिग्ग-
जादिप्रतिष्ठिते ऐरावतपुण्डरीकवामनकुमुदाऽञ्जन-
पुष्पदन्तसार्वभौमसुप्रतीकाख्याष्टदिग्दंतिशुण्डाद-
ण्डोत्तण्डितेतद्ब्रह्माण्डखण्डयोरन्तर्गतभूर्लोकभुवर्लो
कस्वर्लोकमहर्लोकजनलोकतपोलोकसत्यलोकाख्या-
नां सर्वज्ञसर्वशक्तिसमन्वितसर्वोत्तमसर्वाधिपश्रीचतु-
र्मुखप्रभृतिस्वस्वलोकाधिष्ठातृपुरुषाधिष्ठितानामम-
धोभागे फणिराजस्य शेषस्य सहस्रफणामण्डलै-
कफणोपरि सर्षपैककणायमानमहीमण्डलान्तर्गता-

नलवितलसुतलतलातलरसातलमहातलपातालानां
स्वस्वाधिष्ठात्रधिष्ठितानामुपरितने सुमेरुमंदिरमन्द-
राचलनिषधहिमगिरिशृङ्गवद्धेमकूटदुर्धरपारियात्रशै
लमहाशैलमहेंद्रसह्याद्रिमलयाचलविंध्यऋष्यमूकचित्र-
कूटमैनाकमानसोत्तरत्रिकूटोदयाचलास्ताचलपर्य-
न्तानेकाभिधानाद्रिगणप्रतिष्ठितायां जम्बूप्लक्षशा
ल्मलीकुशक्रौञ्चशाकपुष्कराख्यसप्तद्वीपवत्यां लव-
णेक्षुसुरासर्पिर्दधिक्षीरशुद्धोदकाख्यसप्तसागरसमन्वि-
तायांसमस्तभूरेखायां कमलकदम्बगोलकाकारायां
वर्तमानेकुवलयकोशान्तर्गतदलवद्विराजमाने उत्तर-
कुरुहिरण्मयरम्यकभद्राश्वकेतुमालेलावृतहरिवर्ष-
किम्पुरुषभारताख्यनवखण्डवति जम्बुद्वीपे सर्वे
भ्योऽप्यतिरिक्तसारवति देवादिभिरप्यभीष्टसुकृ-
तक्षेत्रभूतहेतुनाभिलाषिततमे अङ्गवङ्गकलिङ्ग-
कालिंगकाम्बोजसौवीरसौराष्ट्रवङ्गालोत्कलमगध-
मालवनेपालकेरलचोरलगौडमलयपाञ्चालसिंहलम-
त्स्यद्राविडद्राविडकर्णाटराटवशूरसेनकोङ्कणयोंक-
णपाण्ड्यपुलिंध्यांध्रद्रोणदशार्णविदेहविदर्भमैथि-

लकैकयकोशलकुन्तलमैन्धुवजावलसावीसिन्धुशा-
लभद्रमध्यदेशपर्वतकाश्मीरपुष्टाहारासिंधुपारसकि-
गान्धारबाह्लीक(हूण)प्रभृतिबहुविधदेशविशेषसं-
पन्ने दण्डकारण्यमहारण्याद्वैतारण्यकामुकारण्यसै-
धवारण्यप्रभृत्यनेकारण्यवति श्रीगंगायमुनासरस्व-
तीगोदावरीनन्दालकनन्दामन्दाकिनीकौशिकीनर्म-
दासरयूकर्मनाशाचर्मण्वतिशिप्रावेत्रवतीकावेरीफ-
ल्गुमार्कण्डेयरामगंगाशतद्रुविपाशैरावतीचन्द्रभा-
गावितस्ताासिन्धुदृषद्वतीप्रभृत्यनेकनदनदीवति कु-
रुक्षेत्रहरिद्वारक्षेत्रमालक्षेत्रादिबहुक्षेत्रान्विते भारतख-
ण्डे तत्रापि-मध्यरेखाकुरुक्षेत्रादमुकदिग्भागे अमु-
कनदीमध्ये श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽ-
ष्टाविंशे कलौ युगे कलिप्रथमचरणे आर्य्यावर्ते
पुण्यबृहस्पतिक्षेत्रे शुभसंवत्सरेऽस्मिन्नमुकायन-
भा० टी०—याज्ञवल्क्यस्मृति और मन्वादि धर्मशास्त्र और श्रुतियोंमें स्त्रियोंका स्वीकार रक्षा यह सिद्ध है इसलिये पुत्र-पौत्रप्रपौत्रादिद्वारा स्वर्गादिप्राप्तिके लिये स्त्रियोंका पाणिग्रहण करना चाहिये और स्त्रियोंको उपदेश करना आचारका तथा भर्ताका पूजन अवश्य कर्तव्य है यहभी याज्ञवल्क्यस्मृति

प्रथम अध्यायमेंभी लिखा है "पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया। सेह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम्॥" अर्थात् जो स्त्री पतिके प्रियमें तत्पर और शुद्ध आचारयुक्त और इंद्रियजित् ऐसी स्त्री इस लोकमें कीर्ति यश और परलोकमें उत्तम गतिको प्राप्त होती है। औरभी लिखा है "स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः।" अर्थात् भर्ताका वचन मानना यही स्त्रीका परम धर्म है। अन्यच्च "गुरुरग्निर्द्विजातानां वर्णानां ब्राह्मणो गुरुः। पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः॥" अर्थात् ब्राह्मणोंका अग्नि गुरु, वर्णोंका ब्राह्मण गुरु है, स्त्रीका एक पतिही गुरु होता है, अभ्यागत सबका गुरु है, इत्यादि अनेक प्रमाणोंसे स्त्रियोंका पतिही गुरु है इसलिये पतिकी सेवा और आज्ञा करनी आचार शुद्ध रखना यही स्त्रीका मुख्य धर्म है इसलिये कुछ यत्किंचित् स्त्रियोंका आचार धर्मशास्त्रोक्त लिखते हैं जो सौभाग्यवती स्त्रीमात्र है उनको प्रातःकाल सूर्योदयके प्रथम चार घडीके तडके (प्रातःकाल) उठकर नेत्रोंको प्रथम जल स्पर्श करना, अनंतर अपने पतिके चरणोंपर शिरको धर प्रणाम कर प्रथम पतिके मुखका दर्शन करना पश्चात् शुद्ध (साफ) दर्पणमें अपना मुख देखना पीछेसे भूमिको प्रोक्षण (छिडकन) सम्मार्जन (बुहारी) लेपनादिसे घरको शुद्ध करे और पृथिवीकी पूजा कर फिर शूद्रकमलाकरोक्त मंगलपाठ पढकर पतिकी सेवा पाद प्रक्षालन आदि कर फिर वेणी (गूत) को कंकपत्र (कंघी) से शुद्ध कर और पुष्पादिक धारण कर भाल (मस्तक) में तिलक लगाय हस्त कर्ण बाहुके भूषणादि धारण कर फिर जिस

प्रकार केशादिक जलसे क्लिन्न (गीले) न होवें तद्वत् स्नान करे इसमें प्रमाणभी जैसे सौभाग्यकल्पद्रुममें लिखा है ॥

यथा—बुद्ध्वा ब्राह्मे मुहूर्ते निजपतिचरणौ संप्रणम्यास्यमस्य प्रेक्ष्य प्रेम्णाथ नैजं शुभमुकुरतले भूमिमभ्यर्च्य पत्नी । प्रातःस्मृत्यादि कृत्वा पतिपरिचरणं संविधायैव वेणीं संरच्याधाय भाले तिलकमथ गलाधो निमज्जेत्सभूषा ॥

भा० टी०—और स्कांदमेंभी लिखा है "प्रसुप्तं च सुखासीनं रममाणं यदृच्छया । आतुरेष्वपि कालेषु पतिं नोत्थापयेत्क्वचित् ॥" अर्थात् पति शयनअवस्थामें हो वा सुखपूर्वक आराममें होय वा स्वेच्छापूर्वक आनंद लेता हो अर्थात् अपनी तखलीफमेंभी होय तबभी पतिको न उठावे और पतिको सर्व प्रकारसे प्रसन्न करे। और हरिद्रा (हलदी) का मर्दन केशरका स्वीकार सिंदूर कज्जल कूर्पासक (बहुदेवाकंगण) ताम्बूल यह स्त्रियोंको मंगलदायक भूषण है। और केशोंका संस्कार कर्णके भूषण तथा हस्तोंके भूषण भर्ताके आयुकी वृद्धिकी इच्छावाली स्त्री इनको मत त्यागे ॥

प्रमाणं—हरिद्रा कुंकुमं चैव कस्तूरी कज्जलं तथा । कूर्पासकं च तांबूलं मांगल्याभरणं

स्त्रियाः ॥ केशसंस्कारकबरिकरकर्णविभू-
षणम् । भर्तुरायुष्यमिच्छंती दूरयेन्न काचि-
त्सती ॥ नियमोदकवार्हि च पत्रपुष्पादिकं
च यत् । सेवेत भर्तुरुच्छिष्टमिष्टमन्नं फला-
दिकम् ॥ तीर्थस्नानार्थिनी नारी पतिपादो-
दकं पिबेत् । शंकरादपि विष्णोर्वा पतिरे-
कोऽधिकः स्त्रियाः ॥

भा० टी०—और नियमका जल और पत्र पुष्प आदि जो पति आज्ञा करे वह आगे रख दे और भर्ताका उच्छिष्ट सेवन करे । और तीर्थस्नानकी इच्छावाली स्त्री पतिका पादोदक पान करे और शंकर विष्णुसे अधिक स्त्रीको पति होता है ॥

श्रीमद्भागवते—स्त्रीणां च पतिदेवानां तच्छु-
श्रूषानुकूलता । तद्बंधुष्वनुवृत्तिश्च नित्यं
तद्व्रतधारणम् ॥ संमार्जनोपलेपाभ्यां सेक-
मण्डलवर्तते । स्वयं च मण्डिता नित्यं परि-
मृष्टपरिच्छदा ॥ कामैरुच्चावचैः साध्वी
प्रश्रयेण दमेन च । वाक्यैः सत्यैः प्रियैः
प्रेम्णा काले काले भजेत्पतिम् ॥ संतुष्टा-
लोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक् । अप्र-

मत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत् ॥
या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा।
हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ॥
दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोऽपि
वा। पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभि-
रपातकी ॥ अस्वर्ग्यमयशस्यं च फल्गु-
कृच्छ्रभयावहम्। जुगुप्सितं च सर्वत्र औप-
पत्यं कुलस्त्रियाः ॥

भा० टी०–स्त्रीलोगोंका पतिही परम देव है इसकाही पूजन करना और आज्ञामें रहना और पतिके बंधु माता पिता इनकी सेवा करनी पतिव्रत धारण करना और पृथिवीकी शुद्धि संस्कार पूजन और अपने शरीरमें भूषण पुष्प धारण करने श्रेष्ठ कायों और वचनोंसे पतिव्रता स्त्री पतिकी सेवा करे और काल अर्थात् ऋतुकालमेंही पतिसे संभोग करे अन्यथा अति-विषयासक्त न होवे और सदैव संतुष्ट और सावधान पवित्र स्नेह-वती रहे। जो स्त्री हरिभावसे लक्ष्मीवत् पूजन करती है विष्णु-लोकमें वह स्त्री पतिके साथ विष्णुजीवत् आनंद भोगती है। यदि पति दुष्ट निर्धन वृद्ध मूर्ख जड रोगीभी होय वह लोकप-रलोकमें सुख इच्छावती स्त्री न तिरस्कार करे। और स्वर्गके न देनेवाला यशके नाश करनेवाला संपूर्ण शास्त्र वेदोंमें निंदित

उपपति अर्थात् जार स्त्रीको होता है इसलिये स्त्रियोंको परपु-रुषसे एकांत भाषण हास्य विहार अति निषिद्ध है । और इसमें याज्ञवल्क्यजीभी लिखते हैं ॥

पितृमातृश्वश्रुभ्रातृजामिसम्बंधमातुलैः । हीना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेत् ॥ पतिप्रियहिते युक्ता स्वाचारा विजि-तेंद्रिया । सेह कीर्तिमवाप्नोति मोदते चोमया सह ॥ रक्षेत्कन्यां पिता विन्नां पतिपुत्रास्तु वार्द्धके । अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः ॥

भा० टी०—पिता माता सास भ्राता बंधुओंकी स्त्रीसंबंधी मातुल इनसे सहित विना भर्त्ताके स्त्री न होवे यदि होय तो निंदित होती है विना भर्त्ताके । और जो स्त्री पतिके प्रियमें हित आचार शुद्ध विजितइंद्रिय सो इस लोकमें सुखको प्राप्त होती है मरने बाद पार्वतीके लोकमें आनंद पार्वतीसे करती है और कन्याको पिता रक्षा करे विवाहीकी पति रक्षा करे वृद्धा-की पुत्र रक्षा करे इनके अभावमें ज्ञाति रक्षा करे अर्थात् स्व-तंत्र स्त्री नष्ट न हो । और वसिष्ठसंहितामें लिखा है ॥

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
पुत्राश्च स्थाविरे भावे न स्त्री स्वातंत्र्यमर्हति ॥

असत्यं साहसं माया मात्सर्यं चलचित्तता ।
निर्गुणत्वमशौचत्वं स्त्रीणां दोषाः स्वभावजाः ॥

भा० टी०—झूठ बोलना साहस माया क्रोध चंचलता नि-र्गुण अपवित्र रहना यह स्त्रियोंके स्वाभाविक दोष हैं ॥

अन्यच्च—पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥

भा० टी०—मद्यका पीना १ बुरी सोभत कुसंगत २ पतिसे वियोग कलह ३ भ्रमण देश स्थानोंमें ४ औरके गृहमें शयन ५ अन्य गृहमें वास ६ षट् दोषोंसे स्त्री दुष्ट होजाती है कारण इसमें स्वतन्त्रता है । इसलिये स्त्रियोंको अपने वश्यमें रखना उचित है । मांसका भक्षण स्त्रीको बडे रोगादि करनेवाला होनेसे वर्जनीय है जैसे चिकित्साशास्त्र भावप्रकाशमें लिखा है " आमिषस्याशनं यत्नात्प्रमदा परिवर्जयेत् । " अर्थ—मांसका भक्षण स्त्री अवश्य छोड दे । व्यासजीभी लिखते हैं ॥

द्वारोपवेशनं नित्यं गवाक्षेण निरीक्षणम् ।
असत्प्रलापो हास्यं च दूषणं कुलयोषिताम् ॥

भा०टी०—और द्वारदेशमें बैठना अर्थात् प्रतिदिन अपने द्वारपर बैठ और सर्व बातमें हास्य (हँसना) और गवाक्ष (झरोखे) से देखना बहुत प्रलाप (वृथा वाद करना) यह कुलस्त्रियोंके दोष हैं ॥

अन्यच्च—स्त्री शूद्रोऽनुपनीतश्च वेदमंत्रान्विवर्जयेत् ॥

भा०टी०—स्त्री शूद्र यह वेदमंत्रोंका त्याग दे इससे पुराण-श्रवणाध्ययन तुलसीपूजन हरितालिकाव्रत गौरीपूजन यह शूद्रकमलाकरसे देख अवश्य कर्तव्य है और भगवान् पराशरजी लिखते हैं ॥

ऋतुस्नातां तु यो भार्य्यां सन्निधो नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥
ऋतुस्नाता तु या नारी भर्तारं नोपसर्पति
सा मृता नरकं याति विधवा च पुनः पुनः ॥

भा० टी०—जो स्त्री ऋतुस्नानके अनन्तर अपने भर्तासे संभोग नहीं करती वह मरनेबाद नरकको प्राप्त होती है और वारंवार विधवा होती है इस प्रकार ऋतुकालमें स्वस्थ हो जो पुरुष स्त्रीको नहीं प्राप्त होता वहभी घोर जो भ्रूणहत्या अथवा गर्भहत्या उसको प्राप्त होता है यदि रोगयुक्त हो तो न जानेसे दोष नहीं होता अन्यथा प्रमादसे जो न प्राप्त होवे वह पापका अधिकारी अवश्य है इसलिये ऋतुकालमें स्त्रीको भर्तासे संभोग आवश्यक है अन्यथा स्वेच्छासे है ॥

पराशरः—दरिद्रं व्याधितं धूर्तं भर्तारं याव-मन्यते । सा शुनी जायते मृत्वा सूकरी च पुनः पुनः ॥

भा० टी०—जो स्त्री निर्धन वा रोगयुक्त वा मूर्ख भर्ताका प्रमादसे तिरस्कार करती है वह स्त्री मरकर शुनी (कुत्ती)

शूकरीके वारंवार जन्मको प्राप्त होती है इसलिये भर्ताका अपमान स्त्रीमात्रको कदाचित् न करना चाहिये ॥

स्मृतिपाराशरः—पत्यौ जिवाति या नारी उपोष्य व्रतमाचरेत् । आयुष्यं हरते पत्युः सा नारी नरकं व्रजेत् ॥

भा० टी०—जो सौभाग्यवती अर्थात् पतिवती स्त्री उपवास व्रत आचरण करती है वह पतिकी आयुको नष्ट कर मरकर नरकको प्राप्त होती है ॥

मनुः—अपृष्टा चैव भर्तारं या नारी कुरुते व्रतम् । सर्वं तद्राक्षसान् गच्छेदित्येवं मनुरब्रवीत् ॥

भा० टी०—जो स्त्री भर्ताकी आज्ञा विना व्रत नियम दानादि करती है उसका फल राक्षसोंको मिलता है ऐसे मनुजी कहते हैं । इस स्मृतिमें मनुजीका आशय है ॥

पाराशरी—नष्टे मृते प्रव्रजिते क्लीबे च पतितेऽपतौ । पंचस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

भा० टी०—नष्ट मृत संन्यस्त क्लीब पतित इन पंच आपत्में स्त्रीको अन्य पति विधान किया है । शंका है कि एक पतिके मरनेपर द्वितीय पति उसके मरनेपर तृतीय चतुर्थ

आदि असंख्य स्त्रीको पति कर्तव्य हैं क्योंकि पराशरजी स्वयं लिखते हैं ' नष्टे मृते ' इत्यादि । उत्तर यह है कि पतिशब्दका क्या अर्थ है यदि तुम कहो कि पति अर्थात् पाणिग्रहण जिससे करा हो तौ हम यह कहते हैं कि ' पतौ ' यह रूप सिद्ध कैसे होता है यदि कहे कि पतिशब्दकी विभक्तिमें ' अच्च घेः ' इस सूत्रसे घिसंज्ञक ङिको ' ओत घिको अत् ' होकर पतौ सिद्ध भया तो हम कहते हैं कि ' पतिः समासे एव घीसंज्ञा ' अर्थात् पतिशब्दकी समासमें घिसंज्ञा होती है तौ यहां समास नहीं एकही शब्द है । और केवल पतिशब्दका सप्तमी विभक्तिमें ' पत्यौ ' यह शब्द बनता है इस लिये यहां असिद्ध असंस्कृत पतिशब्दके प्रयोगसे भगवान् पराशरका यही आशय है कि असंस्कृत अर्थात जिसका पाणिग्रहण न हो केवल वाङ्मात्रसे पति हो अर्थात् वाग्दान मात्र किया हो उस पतिको नष्ट मृत संन्यस्त क्लीब होनेपर और पति स्त्रीको कर्तव्य है और यह बात आचारसे सनातन सिद्ध है । यदि आप यह शंका करें कि भगवान् पराशरजीने यह अशुद्ध (पतौ) प्रयोग लिखा क्या वह हमारे तुमारे सदृश थे वह तो आचार्य धर्मशास्त्रके मुख्य हैं तौ इनका उत्तर देते हैं कि यह जो आपको पूर्वोक्त कहा है सो उनका आशय इस (पतौ) शब्दसेही मालूम होता है । महाशय ! यह भगवान् पराशरजी तो ठीक २ लिख गये परन्तु आपकी समझमें भी गडबड है । पराशरजीने अनञ् तत्पुरुष समासान्त पतिशब्दकी संज्ञा कर (अपतौ) यह शब्द सिद्ध संस्कृत लिखा

है यथा 'न पतिः अपतिः तस्मिन् अपतौ पतिभिन्ने पतिसदृशे ईषत्पतावित्यर्थः तस्य च नष्टे मृते सति स्त्रियामन्यः पतिर्विधेयः' इति। ऐसे पराशरजी अपने आशयको लिखते हैं। यदि तुम कहो कि वहां तो 'क्लीबे च पतिते पतौ' ऐसे लिखा है अपतितौ लिखा नहीं। उत्तर–महात्मन्! यहां पररूप 'एङः पदान्तादति' इस सूत्रसे 'पतिते अपतौ' अकारका पररूप भया है और आगे द्वितीयश्लोकमें भी इस स्मृतिश्लोकको प्रगट करते हैं॥

मृते भर्तरि या नारी ब्रह्मचर्यव्रते स्थिता।
सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः॥

भा०टी०–जो स्त्री पतिकी मृत्युपर ब्रह्मचर्य व्रतको धारण करती है वह मृत्यु होनेपर ब्रह्मचारीवत् स्वर्गको प्राप्त होती है इस लिये पतिशब्दसे असंस्कृत अर्थात् वाग्दान मात्र कहा है तो उक्त दोष न भया, नहीं तो पूर्वोक्त व्यर्थ होता है और इस वाक्यकी दृढताके लिये औरभी प्रमाण देते हैं॥

तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानवे। तावत्कालं वसेत् स्वर्गं भर्तारं यानुगच्छति॥ व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तद्वद्भर्तारमादाय तेनैव सह मोदते॥ पुरुषेणापि चोक्ता या दृष्टा वा

क्रुद्धचक्षुषा । सुप्रसन्नमुखी भर्तुः सा नारी धर्मभाजनम् ॥ चितौ परिष्वज्य विचेतनं पतिं प्रिया हि या मुञ्चति देहमात्मनः । कृत्वापि पापं शतलक्षमप्यसौ पतिं गृहीत्वा सुरलोकमाप्नुयात् ॥

भा०टी०–इत्यादि अनेक प्रमाण सतीविधानके व्यर्थ होते हैं और ' दरिद्रं व्याधितं धूर्तं' "पत्यौ जीवति" इत्यादि "इमा नारीरविधवा" ऋ० मंडल १० सू० ८५ इत्यादि अनेक वेदमन्त्रोंसे विधवाविवाह और उपपतिस्वीकार (जारसे मैत्री) निषिद्ध है । यह मैंने विवाहका अंग समझकर साथ प्रमाणों-के स्पष्ट भाषामें सर्वोपकारके लिये स्त्रियोंका आचार दिङ्मात्र लिखा है जिन महाशयोंको विशेष आकांक्षा हो वह मन्वादि धर्मशास्त्र ऋग्वेदादिमें अच्छी तरह देख लेवे । विस्तारभयसे बहुत नहीं लिखा । इसका प्रचार अवश्य धर्माभिलाषी पुरुषोंको उचित है ॥

इति श्रीकर्पूरस्थलनिवासिगौतमगोत्र (शोरि) अन्वयालंकृतदैवज्ञ दुनिचन्द्रात्मजपण्डितविष्णुदत्त-वैदिककृतस्त्रीणामाचारः समाप्तः ।

इत्यष्टमं प्रकरणं समाप्तम् ॥ ८ ॥

अथ नवमं प्रकरणम्.

अथ रजस्वलास्वरूपम् ।

भावप्रकाशे-द्वादशाद्वत्सराटूर्ध्वमापंचाशत् समांः स्त्रियाः । मासि मासि भगद्वारा प्रकृत्यैवार्तवं स्रवेत् ॥ आर्तवस्रावदिवसादृतुः षोडशरात्रयः । गर्भग्रहणयोग्यस्तु स एव समयः स्मृतः ॥ याज्ञवल्क्येनाप्युक्तम् षोडशर्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत् । ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत् ॥ एवं गच्छन्स्त्रियं क्षामां मघामूलं च वर्जयेत् । सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् ॥ सर्वासामेव चतुर्वर्णस्त्रीणां सर्वत्रादिसम्मतः पूर्वोक्तः समयः ॥ ग्रंथांतरे तु विशेषः ॥ तद्यथा-स्नानदिवसादूर्ध्वं द्वादशपरिमितरात्रावधिर्ब्राह्मण्या दशरात्रावधिः क्षत्रियायाः । अष्टरात्रावधिर्वैश्यायाः षड्रात्रावधिः शूद्राया गर्भधारणे शक्तिरिति ॥ रजस्वलास्वरूपमुक्त्वा नियमानाह भावमिश्रप्रकाशे-आर्तवस्रावदिवसादहिंसा ब्रह्मचारिणी । शयीत

दर्भशय्यायां पश्येदपि पतिं न च ॥ करे शरावे पर्णे वा हविष्यं त्र्यहमाचरेत् । अश्रुपातं नखच्छेदमभ्यंगमनुलेपनम् ॥ नेत्रयोरञ्जनं स्नानं दिवास्वापं प्रधावनम् । अत्युच्चशब्दश्रवणं हसनं बहुभाषणम् ॥ आयासं भूमिखननं प्रवातं च विवर्जयेत् ॥ अमुमेवाशयं यथाह भगवान् धन्वन्तरिः सुश्रुते ऋतौ प्रथमदिवसात्प्रभृति ब्रह्मचारिणी दिवस्वप्नाश्रुपातस्नानानुलेपनाभ्यङ्गालङ्कारमाल्यनखच्छेदन प्रधावनहसनकथनातिशब्दश्रवणावरलेखनायासान्परिहरेत् । दर्भसंस्तरशायिनीं करतलशरावपर्णान्यतमशरावभोजिनीं हविष्याशिनीं त्र्यहं च भर्ता संरक्षेदिति । एतान्नियमानुल्लंघ्य या वर्तते तां प्रति दोषमाह भावप्रकाशे भावमिश्रः॥ यथा—अज्ञानाद्वा प्रमादाद्वा लोभाद्वा दैवतश्च वा । सा चेत्कुर्यान्निषिद्धानि गर्भो दोषांस्तदाप्नुयात् ॥ एतस्या रोदनाद्गर्भो भवेद्विकृतलोचनः । नखच्छेदेन कुनखी कुष्ठी त्वभ्यंगतो भवेत् ॥ अनुलेपात्तथा स्नानाद् दुःशीलोऽभ्यञ्जनाद्दृक्क् । स्वापशीलो दिवास्वा-

पाश्चखलः स्यात्प्रधावनात् ॥ अत्युच्चशब्दश्रवणा-
द्वधिरः खलु जायते । तालुदन्तोष्ठजिह्वासु श्यावो
हसनतो भवेत् ॥ प्रलापी भूरिकथनादुन्मत्तस्तु
परिश्रमात् । स्खलते भूमिखननादुन्मत्तो वातसेव-
नात् ॥अथ चतुर्थदिवसानन्तरं वहति रक्ते गच्छतः
पुरुषस्य दोषमाह भगवान् सुश्रुतः ॥ किञ्च तत्र
प्रथमदिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां
भवति यश्च तत्राधीयते गर्भः सोऽप्रसवमानो विमु-
च्यते प्राणैः ॥ द्वितीयेऽप्येवं सूतिकागृहे वा तृती-
येऽप्येवमसम्पूर्णांगोऽल्पायुश्च भवति ॥ यथा नद्यां
प्रतिस्रोतः प्लाविद्रव्यं प्रक्षिप्तं प्रतिनिवर्तते नोर्ध्वं
गच्छति तद्वदेव द्रष्टव्यम् । तस्मान्नियमवती त्रिरात्रं
परिहरेत् ॥ चतुर्थे तु सम्पूर्णाङ्गो दीर्घायुश्च भवति
अमुमेवाशयं भावप्रकाशे भावमिश्रोऽपि भर्तृकृत्ये
विशिनष्टि दृष्टान्तेन ॥ यथा—प्रवहत्सलिले क्षिप्तं
द्रव्यं गच्छत्यधो यथा । तथा वहति रक्ते तु क्षिप्तं
वीर्य्यमधो व्रजेत् ॥ (अतः) आयुःक्षयभयाद्भर्ता
प्रथमे दिवसे स्त्रियम् । द्वितीयेऽपि दिने रत्यै त्यजे-

ऋतुमतीं तथा ॥ तत्र यश्चाहितो गर्भो जायमानो न जीवति । आहितो यस्तृतीयेऽह्नि स्वल्पायुर्विकलांगकः ॥ अतश्चतुर्थी षष्ठी स्यादष्टमी दशमी तथा । द्वादशी वापि या रात्रिस्तस्यास्तां विधिना भजेत् ॥ विधिना कोऽर्थो गर्भाधानोक्तविधानेन ॥ अत्रोत्तरं विद्यादायुरारोग्यमेव च । प्रजासौभाग्यमैश्वर्यं बलं चाभिगमात् फलम् ॥ धर्मशास्त्रे प्रथमरात्रिचतुष्टयगमने निषेधमाह पाराशरः ॥ प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी पुंसा यथा वर्ज्या तथांगना ॥ व्याधिमती च वर्ज्या ॥ तत्र स्त्रीणां व्याधयः प्रदरादयस्तद्युक्ता निषिद्धा । तत्रापि विशेषात् योनिरोगिणी अशुद्धगर्भदोषमाविष्करोति ॥ प्रकाशे भावमिश्रः । दम्पत्योः कुष्ठबाहुल्याद्दुष्टशोणितशुक्रयोः । यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितमिति ॥ गर्भाधानेऽयोग्यं पुरुषं स्त्रियं चाह स एव ॥ अत्याशितोऽधृतिः क्षुद्रान् सव्यथांगः पिपासितः । बालो वृद्धोऽन्यवेगार्तस्त्यजेद्रोगी च मैथुनम् ॥ रजस्वला व्याधिमती विशे-

षाण्डयोनिरोगिणी । वयोधिका च निष्कामा मलिना गर्भिणी तथा ॥ एतासां संगमात्पुंसां वैगुण्यानि भवन्ति हि ॥ युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु । तत्र स्त्रीपुरुषयोः संभोगे यादृगुक्तस्तादृगुच्यते ॥ स्नातश्चंदनालिप्तांगः सुगन्धिः सुमनोर्चितः । भुक्तवृष्यः सुवसनः सुवेषः समलंकृतः ॥ ताम्बूलवदनस्तस्यामनुरक्तोऽधिकस्मरः । पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे ॥ भार्यापि ॥ पुरुषस्य गुणैर्युक्ता विहिता न्यूनभोजना । नारी ऋतुमती पुंसा संगच्छेतु सुतार्थिनी ॥ पूर्वं पश्येदृतुस्नाता यादृशं नरमंगना । तादृशं जनयेत्पुत्रं ततः पश्येत् पतिं प्रियम् ॥ प्रियमिति भर्तर्यासन्ने पुत्रादिकमपि पश्येत् ॥ अतः किं सिद्धम् ॥ पतिं स्नेहदृष्ट्या तथा पुत्रं पश्येत् ॥ असमीपे एषां भास्करं पश्येत् । एवं मंगलशब्दं चाश्रौषीत् । मधुरान्नं भक्षयेत् ॥ भूषणवस्त्रादिकं संधार्य्य रात्रौ विहिता न्यूनभोजना सुतार्थिनी स्त्री सुमुहूर्ते संगच्छेत् ॥ एतेन दिवसगमननिषिद्धं कर्मकाण्डचिकित्साशास्त्रे । यथा च

गृह्यसूत्रे भगवान् पारस्करः ॥ यदि दिवा मैथुनं व्रजेत्क्लीबा अल्पवीर्या अल्पायुषश्च प्रसूयन्ते तस्मादेतद्वर्जयेत्प्रजाकामो गृहीति । भावप्रकाशचिकित्साशास्त्रे भावमिश्रोऽप्याह ॥ आयुःक्षयभयाद्विद्वान्नाह्नि सेवेत कामिनीम् । अवशो यदि सेवेत तदा ग्रीष्मवसन्तयोः ॥ ग्रीष्मवसन्तयोरित्यत्र भोगार्थं सेवेन्न तु सुतार्थं अन्यथा तस्मादेतद्वर्जयेत्प्रजाकाम इति व्यर्थं स्यात् आवश्यके भोगमपि ॥ गर्भाधानोक्तविधिना सङ्गच्छेदित्युक्ते गर्भाधानमुहूर्तमाह मुहूर्तचिंतामणौ रामः ॥ यथा हस्तानिलाश्विमृगमैत्रवसुध्रुवाख्यैः शक्रान्वितैः शुभतिथौ शुभवासरे च । स्नायादथार्तववती मृगपौष्णवायुहस्ताश्विधातृभिरलं लभते च गर्भम् ॥ यथा हस्तस्वातीअश्विनीमृगशिरअनुराधाउत्तराभाद्रपदारोहिणीज्येष्ठाशुभतिथिरिक्तवर्जितशुभवारसौरारार्कविनेषु रजस्वलायाः स्नानं विधेयं सुस्नाता वस्त्रभूषणसंयुता रात्रौ मृगशिररेवतीस्वातिहस्तआश्विनीरोहिणी एषु भेषु गमनात् स्त्री गर्भं लभते ॥

गमने निषेधमाह स एव ।

गण्डान्तं त्रिविधं त्यजेन्निधनजन्मर्क्षे च मूलान्तकं दास्रं पौष्णमथोपरागदिवसं पातं तथा वैधृतिम् । पित्रोः श्राद्धदिनं दिवा च परिघाद्यर्द्धं स्वपत्नीगमे भान्युत्पातहतानि मृत्युभवनं जन्मर्क्षतः पापभम् ॥ तद्यथा ॥ गण्डान्तं चतुर्घटिकात्मकं ज्येष्ठाशताभिषारेवती एषां तथा तिथिगण्डान्तद्विघटिकात्मकं तथा लग्नगडान्तं नवांशार्धघट्यात्मकं जन्मर्क्षात् अष्टमनक्षत्रं निधनसंज्ञकं मूलांत्यं अश्विनीरेवती तथोपरागः सूर्यचंद्रग्रहणं । 'उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च ।' व्यातिपातवैधृतियोगौ पितुः श्राद्धदिनं तथा दिने परिघार्द्धं एतानि नक्षत्रयोगदिवसानि स्वस्त्रियं संतानार्थं गच्छता पुरुषेण अवश्यं वर्जनीयानि ॥ ऋतुमती स्त्री मनसापि मैथुनचिंतनं न कुर्यात् । उक्तं च बृहन्नारदीये ॥ मैथुनं मानसं वापि वाचिकं देवतार्चनम् । वर्जयेच्च नमस्कारं देवतानां रजस्वलेति ॥ अथ रजस्वलाया ऋतुशुद्ध्यनंतरं पतिरेव द्रष्टव्यः असमीपे पत्युः पुत्रमुखं

द्रष्टव्यं वा सूर्यदर्शनं विधेयं नान्यं पुरुषं मनसा वाचा स्मरेत् चक्षुषा न पश्येत् उक्तमिदं बृहन्नारदीये ॥ स्नात्वान्यं पुरुषं नारी न पश्येच्च रजस्वला । ईक्षेत भास्करं देवं ब्रह्मकूर्चं ततः पिबेत् ॥ ब्रह्मकूर्चं पञ्चगव्यं स्नानानंतरं शुद्ध्यर्थं पातव्यम् ॥

इति श्रीकर्पूरस्थलनिवासिगोतमगोत्र (शोरि) अन्वयालंकृतदैवज्ञदुनिचंद्रात्मजश्रीमच्छ्रीपण्डितविष्णुदत्तवैदिककृतं रजस्वलाकृत्यं समाप्तम् ॥

समाप्तं चेदं नवमं प्रकरणम् ॥ ९ ॥

अथ प्रकीर्णाध्यायः प्रारभ्यते ।

अथ विवाहलग्नादिद्वादशस्थाने सूर्यादीनां फलमाह.

अथ सूर्यस्य फलं.

मृति १ र्विधनता २ धनं ३ सहजसंक्षयाः ४ पुत्रसूः ५ प्रियस्य परमोन्नति ६ र्विधवता ७ चिरंजीविता ८ ॥ शुभाकृति ९ रशीलता १० विविधलब्धि ११ रर्थक्षयः १२ तनुप्रभृति भास्करे सति फलं भवेद्योषिताम् ॥ १ ॥

अथ चंद्रस्य फलं ।

प्राणस्य च्युति १ रर्थसंप २ दुभयप्रीतिश्च ३ बंधून्नाति ४ वैपुत्र्यं च ५ सवैरता च ६ नियत सापत्न्य ७ मात्मव्यथा ८ ॥ स्त्रीसूतिः ९ परकर्म-कृत् १० स्वमाधिका ११ लब्धिक्षयः १२ संपदां स्यादिंदावुदयात्सुखे तु कथितो बंधुक्षयः कैश्चन २ ॥

अथ भौमस्य फलं ।

पंचत्वं १ च दरिद्रता २ सधनता ३ सुभ्रातृवैरं ४ सुतानुत्पत्ति ५ र्दयितोन्नतिः ६ कुचरिता ७ सक्तिश्च रक्तस्रुतिः ८ ॥ स्याद्भर्तृप्रातिकूलता ९ ऽमिषरुचे १० र्वित्ताप्ति ११ रर्थक्षयो १२ नारीणामुदयादि-वर्तिनि महीपुत्रे विवाहोत्सवे ॥ ३ ॥

अथ बुधस्य फलं ।

सौम्ये भर्तृपरायणा १ स्वगृहिणी २ स्यात्स्वा-मिपक्षार्चिता ३ बंधुत्वं च ४ सुतान्विता च ५ विगत ६ प्रद्वेषिपक्षा तथा ॥ वंध्या चा ७ स्वभिरु-ज्झितास्तु कृतिनी ८ मायाविनी ९ च क्रमात् १० भूरिद्रव्यवती ११ बहुव्ययपरा १२ लग्नादिभाव-स्थिते ॥ ४ ॥

अथ गुरोः फलं ।

स्वाभीष्टा १ धनभागिनी २ प्रमुदिता ३ द्रव्या न्विता ४ स्वात्मजा ५ नष्टारि ६ दयितोज्झिता ७ च विगतप्राणा ८ रता श्रेयसि ९ ॥ सिद्धार्था १० विभवान्विता ११ च विधना १२ भावेषु मूर्त्यादिषु ॥ ८ ॥

अथ शुक्रस्य फलं ।

मनोभीष्टा भर्तु १ र्धनचयपरा २ देवररता ३ कुलेष्टा ४ सत्पुत्रा ५ विहितबहुवैरा ६ न्यानिरता ७ ॥ व्यसु ८ र्धर्मेष्टा ९ स्यात्कुशलनिरता १० भूरिविभवा ११ निरर्था १२ शुक्रे स्याद्भवति खलु लग्नप्रभृतिषु ॥ ६ ॥

अथ शनेः फलं ।

स्यात्पुंश्चल्य १ धना २ ऽर्थवत्य ३ थ यशोहीना ४ च हृद्रोगिणी ५ शत्रुघ्ना ६ निजगर्भपातनरता ७ नीरुक् ८ च भग्नव्रता ९ ॥ दुःशीला १० बहुवित्तसंग्रहपरा ११ पानप्रसक्तांगना १२ स्याल्ल-

आद्दविनंदनेन शिखिना स्वभानुना च क्रमात्॥७॥
शनिवत् राहुकेत्वोरपि फलं ज्ञेयम् ॥

इति श्रीकर्पूरस्थलीयदेवज्ञदुनिचंद्रात्मज-
पण्डितविष्णुदत्तवैदिकसंगृहीतं विवाह-
कुंडलीस्थितग्रहफलं समाप्तम् ।
समाप्तश्चायं प्रकीर्णाध्यायः ।

अथ वंशवर्णनम् ।

अस्ति महात्मा किल गौतमो मुनिः कर्ता स्मृति-
शास्त्रपरम्पराणाम् ॥ षड्दर्शने दर्शनमेव पूर्वं
यस्तर्कशास्त्रं प्रकरोन्महर्षिः ॥ १ ॥ तस्यान्वये
रत्नविशुद्धवर्णे कर्णे श्रुतीनां तद्धर्मतत्परे ॥ मत्त-
त्परे सम्प्रति संबभूव कन्हैयारामात्मजतुलसी-
रामः ॥ २ ॥ महाप्रभावश्च हि स महात्मा गंगा-
तटे निर्मलवारिराशौ ॥ एह्येहि पुत्रेति हि वत्स-
लत्वादाहूत एवाऽविशतीह अङ्के ॥ ३ ॥ स्थित्वा
क्षणं तत्र हि अङ्कमध्ये ध्यात्वा शिवं शङ्करमप्रमे-

यम् ॥ संपश्यता तत्र हि साधवानां त्यक्त्वा तनुं ज्योतिरिवावभूव ॥ ४ ॥ तत्सूनुपश्चादिह तत्प्रभावात् संप्राप्तविद्यो गुरवे सकाशात् ॥ संशोभते देवविदां हि मध्ये देवज्ञविद्वान् दुनिचन्द्रनाम्ना ॥ ५ ॥ तदात्मजेनापि हि वैदिकेन अधीतवेदाङ्कदर्शनेन ॥ श्रीविष्णुदत्तेन सुदर्शनेन कृता हि टीका सर्वोपकारिणी ॥ ६ ॥ नत्वा गुरुं शास्त्रनिविष्टचक्षुं दत्तान्वये रत्नमिवावभूतम् ॥ अभूतपूर्वं च हि संप्रभूतं श्रीरामनाथं संशास्त्रिणं हि ॥ ७ ॥ श्रीकाशिजन्मादिह लब्धवर्णं विद्यासमूहस्य द्वितीयमोकः ॥ अधीतयेभ्यश्च हि वेदसर्वं गोपालशास्त्रिस्वगुरुं च मुहुः प्रणोमि ॥ ८ ॥ श्रीहरिभक्तं महात्मानं शास्त्रिणं प्रणमाम्यहम् ॥ यस्य संगात्समालब्धं ज्ञानं विज्ञानमेव च ॥ ९ ॥ मित्रं हि साधुरामं च विष्णुदासं तथैव च अन्यान्स्वाध्यायवर्गान्स्वान्नमस्कृत्य पुन पुनः ॥ १० ॥ कर्पूरस्थले रम्ये अद्रिवेदांक भूमिते ॥ वैक्रमे मधुमासे च कृता टीका मनोरमा ॥ ११ ॥

इति वंशवर्णनं समाप्तम् ।

अथार्कविवाहः ।

प्रयोगरत्ने मात्स्ये ।

ॐ स्वस्ति श्रीगणेशाय नमः ॥ तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् । पुत्रपौत्रादिसंपन्नः कुटुंबी साग्निको वरः ॥ उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन । मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् ॥ नश्यत्येव न संदेहो गर्गस्य वचनं यथा ॥ तत्रैव संग्रहे—तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् । चतुर्थ्यादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् ॥ आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे । शुभे दिने वा पूर्वाह्णे कुर्यादर्कविवाहकम् ॥

व्यासः—स्नात्वालंकृतवासास्तु रक्तगंधादिभूषितम् । सपुष्पफलशाखैकमर्कगुल्मं समाश्रयेत् ॥ सलक्षणेन संयुक्तमर्कं संस्थाप्य यत्नतः । अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत्पुरा ॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् । नांदीश्राद्धे हिरण्येन अष्टवर्गान् प्रपूजयेत् ॥ पूजयेन्मधुपर्केण वरं

विप्रस्य हस्ततः । यज्ञोपवीतं वस्त्रं च हस्तकर्णादिभूषणम् ॥ उष्णीषगंधमाल्यादि वरायास्मै प्रदापयेत् । स्वशाखोक्तप्रकारेण मधुपर्कं समाचरेत् ॥

ब्राह्मे—ग्रामात्प्राच्यामुदीच्यां वा सपुष्पफलसंयुतम् । परीक्ष्य यत्नतोऽधस्तात्स्थण्डिलादि यथाविधि ॥ कुर्यादितिशेषः ॥ कृत्वार्कं पुरतस्तिष्ठन् प्रार्थयेत द्विजोत्तमः । त्रिलोकवासिन्सप्ताश्व छायया सहितो रवे ॥ तृतीयोद्वाहजं दोषं निवारय सुखं कुरु । तत्राध्यारोप्य देवेशं छायया सहितं रविम् ॥ वस्त्रैर्माल्यैस्तथा गन्धैस्तन्मंत्रेणैव पूजयेत् । तत्रैव श्वेतवर्णेन तथा कार्पासतंतुभिः ॥ गन्धपुष्पैः समभ्यर्च्य अंल्लिंगैरभिषिच्य च । गुडोदनं तु नैवेद्यं ताम्बूलं च समर्पयेत् ॥

व्यासः—अर्कं प्रदक्षिणीकुर्वन् जपेन्मंत्रमिमं बुधः । मम प्रीतिकरा येयं मया सृष्टा पुरातनी ॥ अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु । पुनः प्रदक्षिणीकुर्यान्मंत्रेणानेन धर्मवित् ॥ नमस्ते मंगले देवि

१ आपो हिष्ठेत्यादिभिर्ऋग्भिः ।

नमः सवितुरात्मजे । त्राहि मां कृपया देवि पत्नी त्वं मे इहागता ॥ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च । वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय । ततश्च कन्यावरणं त्रिपुरुषं कुलमुद्धरेत् ॥ आदित्यः सविता चार्कपुत्री पौत्री च नप्त्रिका । गोत्रं काश्यप इत्युक्तं लोके लौकिकमाचरेत् ॥ सुमुहूर्तं निरीक्षेत् स्वस्तिसूक्तमुदीरयन् । आशीर्भिः सहितैः कुर्यादाचार्यप्रमुखैर्द्विजैः ॥ अथाचार्यं समाहूय विधिना तन्मुखाच्च तां । प्रतिगृह्य ततो होमं गृह्योक्तविधिनाचरेत् ॥

व्यासः—अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् । गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ अंजल्यक्षतकर्माणि कृत्वा कंकणपूर्वकं । यावत्पंच वृता सूत्रं तावदर्कं प्रवेष्टयेत् । स्वशाखोक्तेन मंत्रेण गायत्र्या वाथवा जपेत् । पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मंत्रतः ॥ बृहत्सामेति मंत्रेण सूत्ररक्षां प्रकल्पयेत् । अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा ॥ कुम्भांश्च निक्षिपेत्पश्चादाग्नेयादिचतुष्टये । सर्वत्र

प्रतिकुम्भं च त्रिसूत्रेणैव वेष्टयेत् ॥ हरिद्रागन्धसंयुक्तं पूरयेच्छीतलं जलं । प्रतिकुंभं महाविष्णुं संपूज्य परमेश्वरं ॥ पाद्यार्घादिनिवेद्यान्तं कुर्यान्नाम्नेव मंत्रवित् ॥

अथ शौनकोक्तो होमप्रकारः ।

तृतीये स्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु । आर्कं विवाहं वक्ष्यामि शौनकोऽहं विधानतः ॥ अर्कसन्निधिमागत्य तत्र स्वस्त्यादि वाचयेत् । नान्दीश्राद्धं प्रकुर्वीत स्थंडिलं च प्रकल्पयेत् ॥ अर्कमभ्यर्च्य सौर्या च गंधपुष्पाक्षतादिभिः ॥ सौर्या सूर्यदैवत्यया ॥ आकृष्णेनेत्यनया ॥ स्वयं बालकृतस्तद्वद्वस्त्रमाल्यादिभिः शुभैः । अर्कस्योत्तरदेशे तु समन्वरब्धा एतया ॥ एतयार्ककन्यया ॥ उल्लेखनादिकं कुर्यादाघारांतमतः परम् । आज्याहुतिं च जुहुयात्संगोभिरनयैकया ॥ यस्मै त्वा कामकामायेत्येतयर्चा ततः परं । व्यस्ताभिश्च समस्ताभिस्ततश्च स्विष्टकृद्भवेत् ॥ परिषेचनपर्यंतमयाश्चेत्यादिकं क्रमात् । प्रार्थनामंत्रादिविशेषमाह व्यासः ॥ पुनः प्रदक्षिणं कृत्वा मंत्रमेतमुदीरयेत् । मया कृतमिदं कर्म स्थावरेषु जरायुणा ॥ अर्कापत्यानि नो देहि

तत्सर्वं क्षंतुमर्हसि । इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसृजेत्पुनः ॥ गोयुग्मं दक्षिणां दद्यादाचार्याय च भक्तितः । इतरेभ्योऽपि विप्रेभ्यो दक्षिणां चापि शक्तितः ॥ तत्सर्वं गुरवे दद्यादंते पुण्याहमाचरेत् ॥

अथ प्रयोगविधिः ।

तृतीयोद्वाहात्प्राग्दिनचतुष्टयाधिकव्यवहिते रविवारे शनिवारे हस्तनक्षत्रे शुभदिनांतरे वा ग्रामात्प्राच्यामुदीच्यां वा पुष्पफलयुतार्काधस्तात्स्थण्डिलं कृत्वाऽर्कपश्चिमत उपविश्य मासपक्षाद्युल्लिख्य मम तृतीयमानुषीविवाहजदोषापनुत्त्यर्थमर्कविवाहं करिष्ये इति संकल्प्य गणेशपूजास्वस्तिवाचनमातृपूजनवृद्धिश्राद्धाचार्यवरणानि कुर्यात् । तत्र वृद्धिश्राद्धं सुवर्णेन ॥ अथाचार्येण पूजितो वरः ॥ त्रिलोकवासिन् सप्ताश्व छायया सहितो रवे । तृतीयोद्वाहजं दोषं निवारय सुखं कुरु ॥ इत्यर्कं संप्रार्थ्याऽर्के ॥ आकृष्णेनेति छायया सहितं रविमावाह्य श्वेतवस्त्रसूत्राभ्यामावेष्ट्य संपूज्यापोहिष्ठेत्यादिभिरभिषिच्य गुडोदनतांबूलादि ... र्घ्यं प्रदक्षिणीकुर्वन् ॥ मम प्रीतिकरा येयं मया

सृष्टा पुरातनी । अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु ॥ इति पठेत् । द्वितीयप्रदक्षिणायां तु ॥ नमस्ते मंगले देवी नमः सवितुरात्मजे त्राहि मां कृपया देवि पत्नी त्वं मे इहागता॥ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च । वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः ॥ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशयेति ॥ तत आचार्येण मासपक्षाद्युल्लिख्य काश्यपगोत्रामादित्यपुत्रीं सवितुः पौत्रीमर्कस्य प्रपौत्रीमिमामर्ककन्यामित्युक्ते वरः स्वस्तिनइंद्रोवृद्धश्रवा इति सूक्तं पठन्नर्कं निरीक्षेत । तत आचार्यो विप्रैः सहाशिषो दत्त्वामुकगोत्रामुकशर्म्मणे संप्रददे इत्यर्ककन्यां दत्त्वा ॥ अर्ककन्यामिमां विप्र यथाशक्ति विभूषिताम् ॥ गोत्राय शर्म्मणे तुभ्यं दत्तां विप्र समाश्रयेति पठेत् । वरस्तु यज्ञो मे कामः समृद्ध्यतामिति प्रथमां धर्मो मे इति द्वितीयां यशो मे तृतीयामिति त्रीनक्षतांजलीनर्कोपरि क्षिप्त्वा गायत्र्या परित्वेत्यादिना वा पंचावृता सूत्रेणार्कमावेष्ट्य तत्सूत्रं पुनः पंचगुणं कृत्वार्कस्य स्कंधे बद्धा गृह-

त्सामेति रक्षां परिकल्प्यार्कस्य दिग्विदिक्ष्वष्टौ कुं-
भान् संस्थाप्य वस्त्रेण त्रिसूत्रेण चावेष्ट्य हरिद्रार्घं-
धाद्यंतः क्षिप्त्वा तेषु नाम्ना महाविष्णुमावाह्य षोड-
शोपचारैः संपूज्य स्थंडिलेऽग्निं प्रतिष्ठाप्य आघारा-
वाज्येनेत्यंतमुक्त्वात्र प्रधानं बृहस्पतिमग्निं वायुं सूर्यं
प्रजापतिं चाज्येन शेषेणेत्याद्युक्त्वाघारांते संगो-
भिरांगिरसोबृहस्पतिस्त्रिष्टुप्॥ अर्कविवाहहोमे विनि-
योगः ॥ ॐ संगोभिरांगिरसोनक्षमाणोभगइवेदर्य-
मणंनिनाय । जनेमित्रोनदंपतीअनक्तिबृहस्पते वाज-
याशूँरिवाजौ स्वाहा बृहस्पतय इदं न ममेति त्यजेत्।
यस्मैत्वाकामदेवोग्निस्त्रिष्टुप् विनियोगः प्राग्वत् ॥
ॐ यस्मैत्वाकामकामायवयंसम्राडयजामहे ॥ तम-
स्मभ्यंकामंदत्त्वाथेदंत्वंघृतंपिबस्वाहाअग्नयइदं० ॥
ततो व्यस्तसमस्तव्याहृतिभिर्हुत्वा स्विष्टकृदा-
दिकर्मशेषंसमाप्यार्कं प्रदक्षिणीकृत्य ॥ मया
कृतमिदं कर्म स्थावरेण जरायुणा । अर्कापत्यानि
नो देहि तत्सर्वं क्षन्तुमर्हसि ॥ इति प्रार्थ्याचार्याय
गोयुग्ममन्येभ्यश्च विप्रेभ्यो यथाशक्ति दक्षिणां दत्त्वा
शांतिसूक्तं जप्त्वा पूर्णोपस्करानाचार्याय दत्त्वा

दिनचतुष्टयमाग्निं कुंभांश्च रक्षेत् ॥ कुंभेषु महा-
विष्णुं पूजयेच्च ॥

पंचमदिनकृत्यं ।

ब्राह्मे—चतुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूज्य च ।
विसृज्य होममग्निश्च विधिना मानुषीं परां ॥ उद्वहे-
दन्यथा नैव पुत्रपौत्रसमृद्धिमान् ॥ इत्यर्कविवाहः
समाप्तः ॥

अथ विवाहनिर्णयः ।

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यसंगृहीतवा-
दार्थसारांशमादायानिश्चयार्थं प्रमाणानि प्रदर्श्यन्ते ।

तद्यथा ईशं नत्वा दर्श्यतेऽत्र वेदादिशास्त्रमानतः
एकस्य कामतोऽनेकसवर्णापाणिपीडनम् ॥ धर्म
तत्वं बुभुत्सूनां बोधनायैव मत्कृतिः । तेनैव कृत-
कृत्योऽस्मि न जिगीषास्ति लेशतः ॥ पाणिग्रह-
णिका मंत्रा नियतं दारलक्षणम् । तेषां निष्ठा तु
विज्ञेया विद्वद्भिः सप्तमे पदे ॥

मनुः—पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते ।
विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदेति ॥

छांदोगपरिशिष्टे—स्वपितृभ्यः पिता दद्यात् सुत-

संस्कारकर्माणि। पिण्डानोद्वहनात्तेषां तदभावेऽपि तत्क्रमादिति ॥ विवाहस्य संस्कारत्वे सति तत्र विशेषो वक्ष्यते ॥ बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति पराशरभाष्यादिधृतकात्यायनवचनेन राक्षसादावपहरणमात्रे कन्यैव ॥

यथा वा—अद्भिर्वाचा प्रदत्तायां म्रियेतोर्ध्वं वरो यदि। न च मंत्रोपनीता तु कुमारी पितुरेव सेति ॥

विवा०—उद्वाहतत्वधृतवाशिष्ठवचनेन वाङ्मात्रदाने उदकपूर्वदाने वा मंत्रसंस्काराभावे अन्यस्मै देयेति मन्यते ॥

मंत्रसंस्कृता तु सा—शरीरार्धं स्मृता जाया पुण्यापुण्यफले समेति ॥ अस्थिभिरस्थीनिमा २ सेस्ते मा २ सानित्वचात्वचामित्यादिभिः शरीरार्धंहरा अर्द्धफलभाग्भवतीत्याशयः ॥

पतिलक्षणं निर्णयसिंधौ यथा—नोदकेन च वाचा च कन्यायाः पतिरुच्यते। पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे इति ॥

तथा च हारीतः—पाणिग्रहणेन जायात्वं कृत्स्नं हि जायापतीत्वं सप्तमे पदे इति ॥

अथ का भार्या कार्या अत्र पेठीनसिः—भार्याः कार्याः सजातीयाः सर्वेषां श्रेयस्यः स्युरिति ॥

केन विवाहेन— गांधर्वादिविवाहेषु शुभो वैवाहिको विधिः । कर्तव्यश्च त्रिभिर्वर्णैः समर्थैश्चाग्निसाक्षिकः ॥ अत्र त्रिभिरिति विशेषणात् विप्रस्यात्र नाधिकार इति विशेषः ॥

का विधिस्तेष्वित्यपेक्षायाम्—गांधर्वासुरपैशाचा विवाहा राक्षसश्च यः । पूर्वं परिश्रयस्तत्र पश्चाद्धोमो विधीयते ॥

सवर्णासु—पाणिग्रहणसंस्कारः सवर्णासूपदिश्यत इति ॥

विप्रेण क्षत्रियादिपरिणयने—शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया ॥ मनुः ॥

तथा च याज्ञवल्क्यः—पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरं । वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥ वस्तुतस्तु—स्वदारनिरतः सदेति मानववचनस्य परदारान् न गच्छेदिति परिसंख्यापरतायाः सर्वैः स्वीकारेण परदारगमननिषेधात् तद्व्युदासेन अनिषिद्धस्त्रीगमनं शास्त्रविहितस्त्रीसंस्कारं विनानुपपन्नमिति संस्कार आक्षिप्यते ॥

सवर्णायां संस्कृतायां स्वयमुत्पादयेत्तु यम् । औरसं तं विजानीयादिति औरसो धर्म्मपत्नीजः ॥ इति याज्ञवल्क्यस्मृतिः ॥

स्त्रीपरिणयनफलम्—अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा । दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्चह ॥ मनुः—लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः । यस्मात्तस्मात्स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः ॥ याज्ञवल्क्यस्मृ० । पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रोक्त इत्यादि पुत्रः । पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति निरुक्तम् ॥ पुत्रेण लोकान् जयति पौत्रेणानंत्यमश्नुते इत्यादि ॥

कीदृशी स्त्री स्यादित्याकांक्षायाम् मनुः—असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने इति ॥

तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते । अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ॥ आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः ॥

दक्षः—न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।

पं० नेत्रपाल

तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते ॥
द्वितीयमायुषो भागं कृतदारो गृहं वसेदिति मनुः ।
अथ नापुत्रस्य लोकोऽस्तीति ॥ नैमित्तिकानि
काम्यानि निपतन्ति यथा यथा । तथा तथैव
कार्य्याणि न कालस्तु विधीयते ॥ अथ प्रथम-
भार्यायां सत्यामन्याधिवेतव्येति नवेति कांक्षायां
मनुः ॥ वन्ध्याष्टमेऽधिवेतव्या दशमे स्त्री मृतप्रजा ।
एकादशे स्त्रीजननी इत्यादि ॥ स्त्रीप्रसूश्चाधिवेतव्या
पुरुषद्वेषिणी तथा इति याज्ञवल्क्यः ॥ अधिविन्ना
तु भर्तव्या महदेनोऽन्यथा भवेदित्युक्ते वंध्यादीना-
मपि भूषणवस्त्रादिभिर्भरणं न तु त्यागः पापभयात् ।
अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् ।
सा सद्यस्तु निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥
एकामूढ्वा तु कामार्थमन्यां वोढुं य इच्छति । सम-
र्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेत् ॥ अप्रजां
दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् । मृतप्रजां पंचदशे
सद्यस्त्वप्रियवादिनीम् ॥

अन्यच्च—अथ यदि गृहस्थो द्वे भार्ये विन्देत कथं
कुर्यादिति बोधायनमाशंक्य यस्मिन् काले विन्दे-

तोभावग्नी परिचरेदित्युपक्रम्य द्वयोर्भार्ययोरन्वारब्धयोर्यजमान इति ॥

तथा च कात्यायनः—नैकयापि विना कार्यमाधानं भार्यया द्विजैः। अकृतं तद्विजानीयात् सर्वाभिर्नारभेद्यदि ॥ एकैकामेवासां संनह्यादेकैकां गार्हपत्यमीक्षयेत्। एकैकामाज्यमवेक्षयेदिति ॥ यदेकस्मिन् यूपे द्वे रशने परिव्ययति। तस्मादेको द्वे भार्ये विन्दतेति श्रुतिः। श्रुतिस्मृतिपुराणानां विरोधो यत्र विद्यते। तत्र श्रौतं प्रमाणं स्यात्तयोर्द्वैधे स्मृतिर्वरा ॥ व्यासः—विरोधे त्वनपेक्षेत सति ह्यनुमानमिति जैमिनिसूत्रम्।

तथा च महाभारते—एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन। नैकस्या बहवः पुंसः श्रूयन्ते पतयः क्वचित् ॥ भार्याः कार्याः सजातीयाः सर्वेषां श्रेयस्यः स्युरित्यत्रापि बहुवचनम् ॥

तथा च कात्यायनः—अग्निहोत्रादिशुश्रूषां बहुभार्यः सवर्णया। कारयेत्तद्बहुत्वे च ज्येष्ठया गर्हिता न चेत् ॥ सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरेति याज्ञवल्क्यः ॥

तथा च महाभारते--ददौ स दश धर्माय कश्यपाय त्रयोदश । एकैव भार्या स्वीकार्या धर्मकर्मोपयोगिनी ॥ प्रार्थने चातिरागे च ग्राह्यानेकापि च द्विज । आद्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि ॥ तदा वैवाहिकं कर्म कुर्यादावसथेऽग्निमान् ॥ नि० सिं०--सदारोऽन्यान् पुनर्दारानुद्वोढुं कारणांतरात् । यदीच्छेदग्निमान् कश्चित् क होमोऽस्य विधीयते ॥ स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन ॥ कात्यायनः ॥

मात्स्ये यथा-उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन । मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् ॥ नश्यत्येव न संदेहो गर्गस्य वचनं यथेति ॥ तृतीयस्त्रीविवाहे तु संप्राप्ते पुरुषस्य तु । अर्के विवाहं वक्ष्यामि शौनकोऽहं विधानतः ॥ इत्युपक्रम्य ॥ विसृज्य होम्यमग्निं च विधिना मानुषीं पराम् । उद्वहेदन्यथा नैव पुत्रपौत्रादिवृद्धिमान् ॥ विसृज्याग्निं कंकणं च मानुषीमुद्वहेत्पराम् । अनेन विधिना यस्तु कुर्यादर्कविवाहकम् ॥ पुत्रपौत्रादिसंपत्तिश्चतुर्थ्यां लभते नरः । चतुर्थादिविवाहार्थं तृतीयेऽर्कं

समुद्वहेत् ॥ ऋणत्रयमपाकृत्य मनो मोक्षे निवेशयेत् ॥ जायमानो वै पुरुषस्त्रिभिर्ऋणैर्ऋणीभवति ब्रह्मचर्येण ऋषिभ्यः यज्ञेन देवेभ्यः प्रजया पितृभ्य इति । एतदुक्तं भवति निदर्शितबहुप्रमाणैरेकपुरुषस्य बहुभार्याकरणं सिद्धम् ॥ एतद्विषये किं स्ववर्णा उत ब्राह्मणादिभिरसवर्णाः कार्या अत्र को मुख्यकल्पः कश्च गौणः ॥

अत्रोच्यते यथाह मनुः—सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः ॥ शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते । ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः ॥

तथाह याज्ञवल्क्यः—तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् । ब्रह्मक्षत्रविशां भार्या स्वा चैव शूद्रजन्मनः ॥ भार्याः कार्या स्वजातीयाः सर्वेषां श्रेयस्यः स्युरिति मुख्यः कल्पस्तदनु चतस्रो ब्राह्मणस्य तिस्रो राजन्यस्य द्वे वैश्यस्येति ॥ सवर्णायां सवर्णासु जायन्ते हि सजातयः । अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः ॥ इति याज्ञवल्क्यपैठीनसिमन्वादिवचनैः स्वजातीयविवाहेषु विशेषफल-

प्रतिपादनात् मुख्योऽयं कल्पः सर्वैराभिवंद्यः ॥ कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः । यदि कामात् रागात् लोभात् क्रमशः प्रवर्तेत तदा चेमं पक्षमाश्रयेदिति निष्कर्षः ॥

याज्ञ० स्मृ० अथ विवाहभेदा निरूप्यन्ते-ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता । तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥ यज्ञस्थ ऋत्विजे चैव आदायार्षस्तु गोद्वयम् । चतुर्दश-प्रथमजः पुनात्युत्तरजश्च षट् ॥ इत्युक्त्वाचरतां धर्मं सह या दीयतेऽर्थिने । सकायं पावयेत्तच्च षड्षड्वं-श्यान् सहात्मना ॥ आसुरो द्रविणादानात् गांधर्वः समयान्मिथः । राक्षसो युद्धहरणात्पैशाचः कन्य-काछलात् ॥ पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम् । वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥

अधिकारिणः कन्यादानस्य-पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥

अथ कतिविधाः पुत्राः-औरसो धर्मपत्नीजस्त-त्समः पुत्रिकासुतः । क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणे-

तरेण वा ॥ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। दद्यान्माता पिता वायं स पुत्रो दत्तको भवेत् ॥ क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः। दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः ॥ उत्क्षिप्तो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः॥ इत्याद्युपक्रम्यांते ॥ पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ॥ इत्यादिप्रमाणैः पुरुषस्य बहुस्त्रीत्वं सिद्ध्यति ॥ अत्राशंक्यते यथा बह्व्यः पुरुषस्य स्त्रिय एवं स्त्रीणामपि बहवः पुरुषाः स्युः ॥ अत्र किं प्रमाणं येन पुरुषेण बह्व्यः स्त्रियः कार्याः ॥ ननु स्त्रिया बहुपुरुषा इति शङ्क्यमानं प्रत्याह श्रूयतां भोः ॥

तथा श्रुतिः—यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मादेको द्वे भार्ये विन्दते ॥ इति श्रुतिः ॥ तस्मादेको बह्वीर्विन्दतेति श्रुतिः ॥ तस्मादेकस्य बह्व्यो जाया भवन्ति नैकस्यै बहवः सहपतय इति श्रुतिः ॥

तथाच स्मृतिः याज्ञवल्क्यः—सकृत्प्रदीयते कन्या हरंस्तां चोरदण्डभाक् । मृते जीवति वा

पत्यौ या नान्यमुपगच्छंति ॥ सेह कीर्तिमवाप्नोति मोदते चोमया सह । इत्यादिश्रुतिस्मृतिनिष्पन्नत्वात्पुरुषस्यैव बह्व्यः स्त्रियो न तु स्त्रीणां बहुपुरुषा अन्यथा व्यभिचारप्रसङ्गः स्यात् ॥

यथाह मनुः—आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसंधत्ते तद्धर्मं वेद नेतरः ॥ नतु स्वकपोलकल्पितयुक्तयः ॥ इति श्रुतिस्मृतिपुराणनिष्पन्नं विवाहस्य संक्षेपतो निर्णयः कृतः । विस्तरस्तु तत्तद्ग्रंथेभ्यो ज्ञेय इति शम् ॥

इति श्रीकर्पूरस्थलनिवासिगोतमगोत्र (शोरि) जात्यालंकृतदैवज्ञदुनिचन्द्रात्मज० पं० विष्णुदत्तवैदिककृतविवाहनिर्णयः समाप्तः ।

पुस्तक मिलनेका ठिकाना—

गंगाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेङ्कटेश्वर " स्टीम् प्रेस,
कल्याण—मुंबई.

खेमराज श्रीकृष्णदास,
" श्रीवेङ्कटेश्वर " स्टीम् प्रेस,
खेतवाडी—मुंबई.

कात्यायनीशान्ति–अर्थात् कात्यायन सूत्रानुसारी
ग्रहशान्तिप्रयोग. ०–२

कात्यायनी तर्पण बडा .... ०–१॥

कुशकण्डिकाभाष्य–इसमें कुण्ड और स्थण्डिला-
दिकी विधि, ब्रह्मा स्थापन आदि विषय हैं. ०–४

गयायात्रापद्धति–(गयाजीमें श्राद्धादि करनेकी
विधि है) ०–४

ग्रहशान्ति–(शुक्लयजुर्वेदोक्त) यह यज्ञोपवीत
तथा विवाहादि शुभकर्ममें बहुत उपयोगी है ०–८

गौडीयश्राद्धप्रकाशमहानिबन्ध–इसमें–श्राद्धस्वरूप,
श्राद्धमें ब्राह्मणलक्षण, महालयादि निर्णय और
श्राद्धप्रयोग, क्षयाहश्राद्ध, संकल्पश्राद्ध, हेमश्राद्ध,
एकादशादिश्राद्ध, मासिकश्राद्ध, मघादिश्राद्ध,
तथा नान्दिश्राद्धादि बहुतसे श्राद्ध और विष्ण्वा-
दिपूजन, पितृतर्पणादि अपूर्व संग्रह हैं। चारों
वर्णोंको उपयोगी है १–०

गोदानपद्धति–इसमें–गोदान देनेवालेको गौका पूजन
दान आदिका संकल्प भलीभांति लिखागयाहै. ....०–१॥

गोदानव्यवस्था. ०–१

गोविन्दार्चनचन्द्रिका, इसमें–संपूर्ण कर्मकाण्ड और
व्रतादिका अपूर्व संग्रह है। यह "गोविन्दार्चनच-
न्द्रिका" ग्रन्थ अर्चनाग्रन्थोंमें अत्युत्तम संग्रह

कियाहै । यह ग्रन्थ श्रौत और स्मार्तधर्मोंको प्रकाश करताहुआ गोविन्द–भगवान्‌की पूजा–अर्चनको १६ उल्लासोंमें प्रकाशित करता है. ५–०

चतुर्लिंगतोभद्र–रंगीन. ०–१

जलाशयोत्सर्गप्रकाश–महानिबन्ध–अर्थात् वापी, कूप तडागादिकोंकी शान्ति–कलशस्थापनसे लेके होमतक भलीभांति है. १–१२

जन्मदिनपूजापद्धति–अर्थात् प्रतिवर्ष अपने २ जन्ममें पूजनीय देवकी पूजनाविधि. .... ०–१॥

ज्येष्ठाशान्ति–ज्येष्ठा नक्षत्रमें जननादि शान्ति .... ०–१॥

तुलसीविवाहविधि ०–२

तुलसीपूजापद्धति .... ०–१॥

तुलसीविवाहपद्धति–इसमें कार्तिकशुक्ल ११ एकादशीके रोज तुलसी और भगवान्‌की लग्न विधि लिखी है. ०–१

तुलसीसन्ध्या–भाषाटीकासहित श्रीस्वामी–विद्याप्रकाश विरचित. .... ०–१॥

दशकर्मपद्धति–इसमें–गर्भाधान, पुंसवन, सीमन्तोन्नयन, नामकर्म, निष्क्रमण अन्नप्राशन, चूडाकर्म, कर्णवेध, उपनयन, वेदारम्भ, समावर्तन–विवाह और चतुर्थीकर्मादिविषय है ०–७

देवऋषितर्पण–नित्योपयोगी है ०–१२

दशलिंगतोभद्र–रंगीन ०–१